THE ORIENTAL PRESS EDITION.

THE

SUBHASITA NIVI

OF

SRIMAD VEDANTA DESIKAR

With the Commentaries of

SREENIVASA SURI

AND

NARAKESARI.

Madras :

PRINTED AND PUBLISHED

BY

L. V. RAMACHANDRA IYER

AT THE ORIENTAL PRESS.

1907.

॥ श्रीमते हयग्रीवाय नमः ॥

श्रीवेंकटनाथार्यविरचिता

॥ सुभाषितनीवी ॥

श्रीनिवाससूरिविरचितरत्नपेटिकाख्यव्याख्यया नरकेसरिकृतव्याख्यया च समेता ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रथमसुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः ।
सर्वं हतः कृतं यौ सकृदुपकारापकाराभ्याम् ॥ १ ॥

इह खलु भगवान्वेङ्कटनाथार्यः कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो राजमहेन्द्रनगरस्थितसर्वज्ञशिङ्गक्षमावल्लभे एकलव्यन्यायेन शिष्ये विशिष्य श्रीवैष्णवधर्मविविदिषया श्रीरङ्गनगरस्थितवेदान्तदेशिकनिकटं प्रति श्रीवैष्णवेषु प्रेषितेषु तदर्थं रहस्यसन्देशतत्त्वसन्देशौ श्लोकञ्च कञ्चित्—

सत्त्वस्थानिभृतं प्रसादय सतां वृत्तिं व्यवस्थापय
त्रस्य ब्रह्मविदागसः तृणमिव त्रैवर्गिकान्भावय ।
नित्ये शेषिणि निक्षिपन्निजभरं सर्वंसहे श्रीसखे
धर्मं धारय चातकस्य कुशलिन्धाराधरैकान्तिनः ॥

निगममौलिगुरोश्चरणाब्जयोर्विरचितप्रणतिर्नरकेसरी ।
तदुपदिष्टसुभाषितनीविकावितृतिमातनुते सुधियां मुदे ॥

शिष्यहितोपदेशरूपां सुभाषितनीवीं चिकीर्षन् आदौ भगवन्तं नमस्करोति—

प्रथमेति ॥ प्रथमसुजनाय पुंसे नमः प्रथमदुर्जनाय मह्यमपि नम इत्यन्वयः ।

इति विरचय्य स्वरूपशिक्षार्थं सामान्यधर्मविशेषप्रतिपादनपरं द्वादशद्वादशपद्यकद्वादशपद्धतिकं सुभाषितनीव्याख्यं नीतिप्रबन्धं प्रणिनाय। तत्र अनिपुणपद्धतिः, दृप्तपद्धतिः, खलपद्धतिः, दुर्वृत्तपद्धतिः, असेव्यपद्धतिः, महापुरुषपद्धति, समचित्तपद्धतिः, सदाश्रितपद्धतिः, नीतिमत्पद्धतिः, वदान्यपद्धतिः, कविपद्धतिः, परीक्षकपद्धतिः इति क्रमः। दोषान्विधूय गुणाः प्रापणीया इति प्रथमं दोषपराः पद्धतय प्रणीताः। तेष्वात्मोत्तारणनैपुण्याभावादनिपुणत्वं, तस्य हेतुर्देहात्मादिविवेकाभाव तदेवाज्ञानं, ततो दृप्तता, खलत्वं, दुर्वृत्तता च, तेन सज्जनैरसेव्यत्वमिति परस्परसङ्गतिः। तथा चाज्ञानस्य सर्वदोषकारणत्वात्तदेवावश्यं परिहरणीयमिति बुद्ध्वा आनृण्यपद्धतिः प्रथमारब्धा। तत्र मङ्गलश्लोकस्य दुर्जनेभ्यो ग्रन्थस्य रक्ष्यत्वपरश्लोकस्य

कुर्व इति शेषः। सौजन्यमानुकूल्यम्। प्रथमत्वं मुख्यत्वम्। प्रथमश्चासौ सुजनश्चेति विग्रहः। सर्वोत्तमानुकूलायेत्यर्थः। प्रतियोगिनो विशिष्यानुपादानात् निष्प्रतियोगिकमानुकूल्यं प्रतीयते। निष्प्रतियोगिकसत्यानुकूल्यस्याप्रसिद्धेः आक्षेपस्य विनिगमनाविरहेण सर्वविषयत्वात्। अनुकूलत्वं हि सुखप्रयोजकत्वं दुःखनिवर्तकत्वं वा। तस्मादचेतनं प्रतियोगितया नाक्षिप्यते अयोग्यत्वात्। किन्तु सर्वं चेतनजातम्। 'रसो वै सः। रसँ ह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति' इति श्रुतिः। 'सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति' इति स्मृतिः। 'पितामहस्य जगत' इत्यादि च। 'सर्वभूतसुहृदं दयानिधिम्' इत्यादीन्यभियुक्तवचनान्यस्मिन् अर्थे प्रमाणम्। भगवन्नमस्कारः किमर्थमिह क्रियत इति चेत्। 'सर्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम्। नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्' इति महर्षिवचनेन सर्वकर्मादौ कर्तव्यतया विहितत्वात्। प्रबन्धनिर्माणादौ देवतानमस्कारः कर्तव्यश्चेत् देवतागारं प्रविश्य कामं नमस्कारः क्रियतां किमर्थमभिलाप इति चेत् 'नारायणं नमस्कृत्ये'ति स्मृतिवचने वाङ्मनःकायजन्यस्य त्रिविधस्यापि नमस्कारस्य कर्तव्यत्वमभिप्रेतामिति आचार्याणामाशयः। एतमेवाभिप्रायमाविष्कर्तुं तादृशपद्यनिर्माणस्य दिव्यप्रबन्धमध्ये निवेशः। किञ्च वाचिकनमस्कारस्य पद्यरूपस्य करणे प्रबन्धमध्यनिवेशे च सति शिष्यैरपि प्रबन्धं पठद्भिर्वाचिकनमस्कारः कृतस्स्यादित्यभिप्रेत्य पद्यनिर्माणं, तस्य पद्यस्यादौ निवेशश्च। इतरत्र सम्भावितस्य सर्वातिशयितसौजन्यादिरूपस्यासाधारण-

पद्धतिनियमितद्वादशश्लोक्यन्तर्गतत्वात्तयोरप्यनिपुणपरतां प्रतिपादयितुं तद्दोषकीर्तनम् । तत्रायं मङ्गलश्लोकः—**प्रथमेति** ॥ प्रथमश्चासौ सुजनः परमपुरुषः तस्मै नमः । 'पूर्वापरप्रथमसमानमध्यमध्यमवीराश्च' इति प्रथमशब्दस्य पूर्वनिपातनियमः । स्वस्य दुर्जनत्वे उच्यमाने सर्वेषां स्वात्मनि दुर्जनप्रतीतिर्भवतीति मत्त्यमित्युक्तम् । परमपुरुषसमानधर्मवत्त्वात्स्वस्यापि नन्तव्यत्वमित्यभिप्रायेणाह—सर्वं हतः इति । यौ परमपुरुषोऽहञ्च सकृदुपकारापकाराभ्यां कृतं सर्वं हतः नाशयतः । हन हिंसागत्योरित्यस्माल्लटः तसि, तसेर्डित्त्वात् 'अनुदात्तोपदेश—'

गुणगणस्याभिधानादेवागतत्वस्य नारायणस्य भङ्ग्यन्तरेण पुंस इति सामान्यशब्देनाभिधानात् पर्यायोक्तमलङ्कारः । 'पर्यायोक्तन्तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्' इति । प्रथमदुर्जनाय मह्यमपि इत्यत्र दौर्जन्यं दुष्टजनत्वं पूर्ववद्विग्रहः । एतेन दौर्जन्यनिवर्तनमेव दुर्जननमस्कारप्रयोजनमिति सूच्यते । तथा च श्रुतिः—' रुद्रो वा एष यदग्निस्तस्य यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि ' इति सञ्चितस्याग्नेः क्रुद्धव्याघ्रसाम्यं प्रतिपाद्य 'सञ्चितमेतैरुपतिष्ठत' इति क्रोधशान्त्यर्थतया नमस्कारगर्भमुपस्थानं विधाय 'नमस्कारैरेवैनं शमयती'ति नमस्कारस्य क्रोधशान्ति फलमाह । ननु सत्पुरुषेषु कृतं नमस्कारादिकं क्रोधशान्त्यादिकं फलति न तु दुर्जनेषु । अत एव समुद्रराजं प्रति रामवाक्यम्—'प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता । असामर्थ्यं फलन्त्येते निर्गुणेषु सतां गुणाः ॥' इति दुर्जननमस्कारो निष्फल इति चेत् नैकान्ततो दुर्जननमस्कारादिकं निष्फलं क्वचित्फलवत्त्वदर्शनात् । अत एव सम्पातिं प्रति सुपार्श्ववचनम्—'न हि सामोपपन्नानां प्रहर्ता विद्यते क्वचित्' इति । सुपार्श्वोऽपि सत्पुरुष इति चेत् वसुदेवानुनीतस्य कंसस्य क्रोधशान्तिर्द्रष्टव्या । ननु अन्यगतं नमस्कारादिभिः निवर्त्यते स्वगतं प्रातिकूल्यं परिजिहीर्षामात्रेण निवर्तयितुं शक्यते । नमस्कारादिकं नापेक्ष्यते अतस्स नमस्कारो व्यर्थ इति चेत्र । स्वगतप्रातिकूल्यनिवर्तनस्य नमस्कारानिरपेक्षत्वेऽपि स्वविशेषणीभूते दौर्जन्यशब्दवाच्ये कामक्रोधादिके दोषे यत्प्रातिकूल्यं तस्य नमस्कारनिवर्त्यत्वेन कामक्रोधादेः नमस्कारोद्देश्यत्वोपपत्तेः । नन्वात्मगुणनिरूपणस्य कामक्रोधादेरचेतनत्वात् अनमस्कार्यता देवतारूपस्य तु दौर्जन्यशब्दवाच्यत्वाभावेन अविशेषणत्वान्न तत्र नमस्कारः पर्यवस्यतीति चेत् देवतारूपस्यात्मगुणवृद्धिक्षयहेतुतया दोषत्वेन दौर्जन्यशब्दवाच्यत्वात् आत्मविशेषणत्वाच्च तत्र नमस्कारप्रार्थनासम्भवात् । अत एव रामा-

इत्यादिनानुनासिकलोपः । 'सकृदप्युपकारेण कृतेनैकेन तुष्यति । न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥' इति दासेन क्रियमाणशरणागतिमपि भगवतो निरुपाधिककारुण्यतया रक्षापेक्षाप्रतीक्षत्वेन स्वस्योपकारं कृत्वा सर्वं पापजातं नाशयतीत्यर्थः । आत्मा तु हितवृत्तिमाचरेत्युपदेशमेव स्वस्यापकारं मत्वा भगवत्कृतोपकारमकुर्वन् तस्मै द्रुह्यति । तदेव सर्वकृतनाशनम् । तदुक्तम्—'प्रथितं पातकिवर्गे

यणे कामप्रातिकूल्यायत्ता रुद्रस्य रागवृद्धिः रुद्रकोपः कामपराभवश्च स्मर्यते ।'क्रोधात्मा स तु दुर्मेधा हुङ्कृतश्च महात्मना ' इति । कालिदासश्चाह—'कोपं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति । तावत्स बह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥'इति । तस्माद्रागवृद्धिहेतुत्वेन कामस्य देवतारूपस्यापि दोषत्वेन दुर्जनशब्दजन्यप्रमितिविशेषविशेष्यतायां प्रकारत्वमुपपद्यते । प्रकारांशे नमस्कारः पर्यवस्यतीत्युपपन्नम् । एवं देवतांशे पर्यवसानं मत्वा अन्यत्राप्याचार्यैः प्रार्थिता 'अन्योन्यवैरिजननी विजहौ त्वसूयेति'। यद्वा अचेतनमपि चेतनवत्सम्मुखीकृत्य कवीनां वचो दृश्यते । 'वाहि वात यतः कान्ता तां, स्पृशे'ति । उत्तररामचरिते 'हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम् । रामस्य गात्रमसि निर्भरगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते ॥' ' शरैनं जहि रावणिम्' इत्यादि । तद्वदचेतने वा कामक्रोधादिके चेतनवन्नमस्कारः । प्राचीनपक्षेऽपि न देवतान्तरनमस्कारशङ्का । तदन्तर्यामिणि पर्यवसानात् तद्विशेषणभूते कामक्रोधादिके नमस्कारानन्वयात् । मूलमन्त्रद्वयद्वादशाक्षरादिगतनारायणवासुदेवादिशब्दजन्यप्रमितौ नारवासुशब्दवाच्यस्य चेतनजातस्य प्रकारत्वेऽपि तत्र नमस्कारानन्वयात् तन्मन्त्रोच्चारणं न देवतान्तरनमस्काररूपं । तद्वत् । एतावान्विशेषः सर्वत्र विशेष्यांशशक्त्या विशेषणशरीरी परमात्मा प्रतिपाद्यते विशेषणशक्त्या विशेषणांशः केवलः प्रतीयत इति इह तु विवक्षाविशेषात् विशेषणशक्त्यापि विशेषणांशशरीरः परमात्मा प्रतीयत इति । यद्वा विशेष्यशक्त्या विशेष्यशरीरकः परमात्मा प्रतीयते । पुनरेतादृशं मां मा द्विः करादित्येतदर्थं दौर्जन्यविशिष्टस्वशरीरके परमात्मनि नमस्कारो युज्यते । अतो नात्मनमस्कारवैयर्थ्यशङ्का । परमात्मनमस्कारादेव न मङ्गलाचरणश्लोके निवेशानुपपत्तिः । दुर्जनीयस्योपेक्षणीयत्वप्रतिपत्त्या वा दुर्जननमस्कारः। उपेक्षार्थतया नमस्कारदर्शनात्। 'मातङ्गेन खरक्रयस्समतुला कर्पू-

कृतघ्न एकोऽपि कृत्स्नमतिशेते। तमिमं क्रियमाणघ्नस्तमपि दुरात्मा करिष्यमाणघ्नः ॥' इति । दुर्जनस्स्वोपकर्तरि अनिष्टमाचरति । दुर्जनस्वभाव एषोऽज्ञ इति पद्धत्यन्वयः। अनेन स्वोपकारिणि नाहितमाचरणीयमिति धर्मबोधः । 'उपकारिणि यस्साधुस्सा-

---

रकार्पासयोरेषा यत्र विभावना विजयते देशाय तस्मै नमः' इत्यादौ गुणव्यतिरेकेण सौजन्यं दौर्जन्यं नाम न किञ्चित् । अतो गुणदुर्गुणपौष्कल्यनिदर्शनार्थतया कृतज्ञत्वकृतघ्नत्वाख्यातौ द्वौ गुणदुर्गुणावुत्तरार्धेन दर्शयति । यौ प्रथमद्वितीयनमस्कार्यौ सकृदुपकारापकाराभ्यां अनुपकारणत्वाभावेऽपि व्याजमात्रभूताभ्यां सर्वं कृतम् अपकारजातमुपकारजातं च क्रमेण हतः निष्फले कुरुतः। प्रथमः सकृदुपकारेण प्राक्कृतं भूयस्तरमपकारं हन्ति । तस्य फलं नरकपातादिकं न प्रयच्छति । द्वितीयोऽपि सकृदपकारेण पूर्वकृतं बहुलमुपकारजातं हन्ति तस्य फलमुपकर्तुः प्रीत्युत्पादनं न करोति प्रत्युत तस्मिन्ननार्यमाचरति । एवं वदद्भिराचार्यैः 'कथञ्चिदुपकारेण कृतेनैकेन तुष्यती'ति पूर्वार्धगतस्य कथञ्चिदुपकारेणैक्यस्य 'न स्मरत्यपकाराणां शतमप्यात्मवत्तया' इति उत्तरार्धानुषङ्गो विवक्षित इति महर्षितात्पर्यं सूचितम्। उचितं च निर्व्याजमेव सर्वापकारसहने राक्षससेनायाः शम्बुकादेश्च शिक्षा न स्यात् व्याजसापेक्षत्वे तु व्याजाभावादेव तेषां शिक्षा युज्यते। सीतातर्जनकारिणीषु राक्षसीषु पश्चादानुकूल्यरूपव्याजसद्भावात् शिक्षाभावश्च युज्यते । सर्वं कृतं हत इति सर्वापकारोपकारविस्मरणाभिधानेन कृतज्ञत्वकृतघ्नत्वयोः काष्ठागतत्वं सूचितम् । गुणदुर्गुणपौष्कल्यनिदर्शनोपात्तयोः कृतज्ञत्वकृतघ्नत्वयोः काष्ठागतत्वसूचनादेव गुणदुर्गुणान्तरेषु काष्ठागतत्वं सूचितम्। गुणदुर्गुणानां काष्ठागतत्वादेव सुजनदुर्जनप्राथम्यमुपपद्यत इत्यपि सूचितम्। विवेकनिधीनामाचार्याणामात्मनि अविद्यमानकृतघ्नत्वादिदुर्गुणजातानुसन्धानं कथमुपपद्यत इति चेत् अनादौ संसारे विवेकोत्पत्तेः पूर्वं सर्वं सर्वस्य सम्भवतीत्यभिप्रायेणेति द्रष्टव्यम् । यद्यप्युत्पन्नविवेकैर्नष्टेभ्यो गुणेभ्यो न भेतव्यम् । तथापि संसारानुवृत्तितः सर्वोऽप्यनर्थः सम्भावित इति भीत्या दुर्गुणानां प्रयत्नेन परिहर्तव्यत्वानुसन्धानम् । अतएव विदुषामपि प्रयत्नेन कामक्रोधपरिहर्तव्यता स्मर्यते । 'इन्द्रियाणां विचरतां विषयेष्वपहारिषु । संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥' इति प्रमादादपहारे तेषामुत्पन्ननाशकत्वमपि स्मर्यते । 'इन्द्रियाणां हि सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवो-

धुत्वे तस्य को गुणः । अपकारिणि यस्साधुस्स साधुरिति कथ्यते ॥' इति अपकारिण्यपि हिताचरणस्यैव विधानात् । 'कृतघ्ने नास्ति निष्कृतिः' इति महादोषस्मर-

---

दक' मिति । अतो दुर्गुणेभ्यो भीतैस्तत्परिहर्तव्यत्वाविस्मरणाय तेभ्यो नमस्कारः प्रयुज्यते । ननु सर्वं हत इत्यत्र स्वस्यापि हननकर्तृत्वात् प्रथमपुरुषप्रयोगानुपपत्तिः उत्तमपुरुषस्यैव प्रयोक्तव्यत्वात् 'अस्मद्युत्तम' इत्यनुशासनादिति चेन्न । आत्मनः कर्तृत्वेऽपि अस्मच्छब्दमनुपादाय यावितिशब्दान्तरेणैव निर्देशात् प्रथमपुरुषोपपत्तिः । 'रामो द्विर्नाभिभाषत' इति रामवाक्यम् 'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसस्सोऽप्यत्रैव निहन्ति राक्षसभटान् जीवत्यहो रावण' इति रावणवाक्यं 'शशधरधर्मा प्रकाशयति' 'गङ्गेशस्तनुते न वचसा' इत्यादिकं चात एवोपपद्यते । 'अस्मद्युत्तम'इति सूत्रे पूर्वसूत्रात् स्थानिन्यपीत्यनुवृत्तेरस्मच्छब्दाप्रयोगेऽप्यस्मदर्थस्य कर्तृत्वमात्रेणोत्तमपुरुष एव द्रष्टव्यः। अत एव 'प्रपद्ये तं गिरिं प्राय' इत्यादिकमुपपद्यत इति चेत्तर्हि मध्यमपुरुषस्यापि युष्मदि स्थानिन्यपि सम्भवात् युष्मदर्थस्य कर्तृत्वविवक्षायां सर्वत्र मध्यमपुरुषोऽपि स्यात् । तथा च भवान् करोतीत्यादौ मध्यमपुरुषस्स्यात् । न । शब्दान्तरेणैव यत्र निर्देशस्तत्रैव युष्मदस्मदर्थस्य कर्तृत्वेऽपि न मध्यमोत्तमपुरुषौ । प्रपद्ये तं गिरिमित्यत्र कर्तुरस्मदर्थस्य केनापि शब्देनानिर्देशात् उत्तमपुरुषोपपत्तिः । भवान् करोतीत्यत्र युष्मदर्थस्य कर्तुः शब्दान्तरेणैव निर्देशात् मध्यमपुरुषानुपपत्तिरिति चेन्न । 'तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् । मन्दः कवियशःप्रार्थी गमिष्याम्यपहास्यताम् ॥' इत्यादिषु युष्मदस्मच्छब्दावनुपादाय शब्दान्तरेणैव तदर्थनिर्देशेऽप्युत्तमदर्शनात् । तस्माद्युष्मदस्मच्छब्दजन्यतदर्थप्रतीतितात्पर्ये सति मध्यमोत्तमौ नेयौ नान्यत्रेति वक्तव्यम्। तितीर्षुर्दुस्तरं मोहादित्यादौ शब्दान्तरसत्त्वेऽपि युष्मदस्मच्छब्दाभावेऽपि तज्जन्यतदर्थप्रतीतितात्पर्यमस्तीति मध्यमोत्तमपुरुषप्रयोगा निर्वाह्याः। भवान् करोति शशधरधर्मा प्रकाशयतीत्यादौ तादृशतात्पर्याभावेन मध्यमोत्तमपुरुषविध्यविषयत्वात् 'शेषे प्रथम' इति प्रथमपुरुषोपपत्तिः। मध्यमोत्तमपुरुषप्रयोगाप्रयोगव्यवस्थासिद्ध्यर्थं युष्मदस्मच्छब्दजन्यतदर्थप्रतीतितात्पर्यस्य नियामकत्वे सिद्धे शब्दोपस्थितिं विना हेत्वन्तरजन्यार्थोपस्थितिमादाय वाक्यार्थबोधं वदतो गुरोर्मतमनुपपन्नमिति ज्ञातव्यम् । तन्मते तादृशप्रयोगाप्रयोग-

णाच्च । अत्र 'नमः पतनशीलाय खलाय मुसलाय च । कुर्वाते स्वमुखेनैव बहुधान्योपखण्डनम् ॥' इतिवत् परमपुरुषसमानधर्मतया नन्तव्यत्वोक्त्या स्तुत्या निन्दाभिव्यक्तिरिति व्याजस्तुत्यलङ्कारः । तदङ्गं भगवत्तुल्यत्वकीर्तनात्तुल्ययोगितेति अङ्गाङ्गिभावेन सङ्करः ॥ १ ॥

व्यवस्थापकाभावात् केवलार्थस्मृतेर्वाक्यार्थबोधाङ्गत्वे साक्षादेवार्थे स्मर्तुं शक्ये तदर्थं शब्दस्मृतेरनपेक्षितत्वेन तादृशशब्दाप्रयोगस्थले तज्जन्यतदर्थस्मृतितात्पर्यस्यासम्भावितत्वात् । शब्दजन्यार्थप्रतीतेरेवाङ्गत्वे साक्षादर्थस्मृत्या शाब्दबोधानुदयात् तादृशतात्पर्यं घटते । तेन च प्रयोगाप्रयोगव्यवस्थितिरुपपद्यते । अत्र चोपमानोपमेयगतसौजन्यदौर्जन्ययोः काष्ठागतत्वेन प्रणतिप्रयोजकत्वेन च सादृश्यापन्नयोस्साधारणधर्मतया विवक्षितयोः पृथगुपादानात् दृष्टान्तालङ्कारः । 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृति' रिति तस्य लक्षणम् । साधारणधर्मत्वेन विवक्षितयोः द्वयोः धर्मयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्युक्तम् । स्वेतरसर्वजातीयातिशयितत्वेन सर्वसुजनोत्कृष्टो भगवान् सर्वदुर्जनोत्कृष्टो मत्सम इति सादृश्यप्रतीतिः साक्षादेव वर्ण्ये परमात्मनि रुचिं नोत्पादयतीति । किन्तु कृतघ्नत्वादिदोषैर्न मत्सम इति दोषप्रयुक्तसादृश्याभावबुद्धिजननद्वारा । 'त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान्' इत्यत्र राजनि चन्द्रसादृश्यबुद्धिस्साक्षादेव रुचिं जनयति न द्वारान्तरमपेक्षते कीर्तिकान्त्योः धावल्येन ह्यत्वे स्वाश्रयप्रकाशत्वेन सादृश्यमनुक्तमपि स्फुरति । सौजन्यदौर्जन्ययोस्तु अत्यन्तविरुद्धयोस्साधारणधर्मानुक्तौ सादृश्यास्फूर्तेः सर्वकृतघातप्रयोजकत्वकाष्ठागतत्वप्रणतिप्रयोजकत्वानां साधारणधर्माणामभिधानम् । एवं साधारणधर्माभिधानेऽपि परस्परविरोधप्रसिद्धेरतिबलत्वात् साक्षादेव सादृश्यबुद्धिर्न रुचिं जनयति । किन्तु वैलक्षण्यबुद्धिजननद्वारैव अस्मादेव भेदादयं वैधर्म्यदृष्टान्तः । वैधर्म्येण दृष्टान्तो वैधर्म्यदृष्टान्तः । वैलक्षण्यबुद्धिद्वारा दृष्टान्तस्य रसावहत्वात् । यत्त्विदं वैधर्म्यदृष्टान्तोदाहरणम्–'कृतं च युद्धाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः । तमांसि तिष्ठन्ति हि तावदंशुमान् न यावदायात्युदयाद्विमौलिताम् ।' इति तत्रापि दृष्टान्तवाक्यार्थबुद्धेः तमोव्यापकसूर्योदयाभावद्विषदभावव्याप्ययुद्धौन्मुख्ये वर्ण्ये । अत्र नमनरूपं वृत्तितौल्यं न तुल्ययोगिता अस्मदर्थगतत्वेन वर्ण्यगतत्वाभावात् । अत एव गुणोत्कृष्टेन परमात्मना नन्तव्यत्वेन समीकृत्य दुर्जनस्याभिधानमपि । तुल्ययोगिताभावात् वर्ण्या-

प्रमितिपरिष्कृतमुद्रा सहृदयहृदये समर्पिता कविभिः ।
भवति सुभाषितनीवी पटुगुणचोरैरहार्यार्था ॥ २ ॥

करिष्यमाणग्रन्थस्य नामनिर्देशपूर्वकं काव्यार्थचोरेभ्यो रक्ष्यत्वमाशास्ते— **प्रमितीति** ॥ प्रमित्या यथार्थबुद्धया परिष्कृता मुद्रा यस्यास्सा तथोक्ता स्वाधीन-प्रमितिमतामेव ग्राह्यार्थवत्त्वमिति प्रमित्या मुद्रात्वरूपणम् । धनपक्षे इयदत्र धनं निक्षिप्तमिति प्रत्ययाय परिष्कृतमुद्रा भवतीत्यर्थः । कविभिः सूरिभिर्वाणिग्भिश्च सहृदयहृदये सारग्राहिप्रामाणिकहृदये समर्पिता निवेदिता सुभाषितानां नीतिवाक्या-नां नीवी मूलधनं इयं कृतिः । यथा मूलधनेन धनवृद्धिः सम्पाद्यते तथा अनया बुद्धिमद्भिः सुभाषितवृद्धिः सम्पाद्यत इति मूलधनत्वरूपणम् । पटवो ये गुणाः काव्योपस्कारकाः शब्दार्थविशेषाः तेषां चोरैः । अन्यत्र पटवो गुणाः भित्तिभेदन-चातुर्यादिगुणाः येषां तैस्तथोक्तैश्चोरैः अपहर्तृभिः अहार्यो ग्रहीतुमशक्योऽर्थोऽभि-धेयं धनं च यस्याः सा तथोक्ता भवति । कुकविदुर्ग्रहार्था भवतीति भावः । अनेन सत्कविभिः स्वस्वप्रणीतसुभाषितग्रन्था रक्षणीया इति प्रतीतिः फलं । काकवयः

वर्ण्ययोः सुजनदुर्जनयोः नमस्काररूपधर्मैक्यमपि न दीपकम् । सुजने दुर्जनबुद्धेः सादृश्यबुद्धे रसावहत्वाभावेन अलङ्कारस्यैवासिद्धेः वैलक्षण्यबुद्धिजननद्वारा तु कथ-ञ्चिन्निर्वाह्यम् । सुजनदुर्जनयोः क्रमेण सकृदुपकारापकारान्वयो यथासङ्ख्यम् ॥ १ ॥

प्रमितीति ॥ समानम् आचार्यहृदयम् येषां कव्यन्तरहृदयानां तानि कव्यन्तरहृदयानि आचार्यहृदयसदृशानीत्यर्थः । सहृदयानि हृदयानि येषां कवीनां ते सहृदयहृदयाः तादृशैः कविभिः । प्रमितिपरिष्कृतिमुद्रा समर्पिता एतद्दृष्टीनां कव्यन्त-राणां सुभाषितार्थसौन्दर्यबोधः प्रमितिः तया प्रमित्या सुभाषितनीव्या या परिष्कृतिः गूढार्थाविष्करणरूपा शाब्दचातुर्याविष्करणरूपा च सा मुद्रात्वेन रूप्यते । नीव्यामन्तर्ग-तार्थापहारप्रतिबन्धकत्वेन क्रियमाणं यच्चिह्नं तन्मुद्राशब्दार्थः । प्रमितिपरि-ष्कृतिरेव मुद्रेति कर्मधारयः । अस्यामित्यध्याहारः अस्यां सुभाषितनीव्यां समर्पिता तादृशमुद्रासमर्पणादेव सुभाषितनीवी परगुणचोरैः अहार्यार्था भवति । सुभाषितं वक्ष्यमाणं श्लोकजातं तन्नीवीत्वेन रूप्यते अनेकार्थगर्भत्वात् । अर्थपूर्णा क्षुद्रभङ्गिका

पश्यति परेषु दोषानसतोऽपि जनः सतोऽपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन्महिमा मोहाञ्जनस्यैषः ॥ २ ॥

परेच्छिष्टोपजीविनो बहिष्कास्या इति निन्दाप्रतीतिश्च । स्वकीयापूर्वशब्दार्थस्फुरणाभावे सति परकीयशब्दार्थान् गृहीत्वा अस्माभिः कृतमिति प्रकाशनं सरस्वतीचौर्यरूपं आत्मनाशकरमित्यजानतां अनैपुणमिति पद्धत्यन्तःप्रवेशः । बद्धवैराणि भूतानीति न्यायेन दोषगणनं शिक्षारूपं न निन्दातात्पर्यकमाचार्याणामिति मन्तव्यम् । अत्र श्लोके वणिग्व्यवहारप्रतीतेः समासोक्तिः । अन्येऽपि काव्यार्थचोरेभ्यः स्वग्रन्थस्य रक्ष्यतां आशासाना दृष्टाः—'साहित्यपाथोनिधिमन्थनोत्थ कर्णामृतं रक्षत हे कवीन्द्राः । यत्तस्य दैत्या इव लुण्टनाय काव्यार्थचोराः प्रगुणीभवन्ति' इति ॥

पश्यतीति ॥ जनः पामरजनः । 'जनो महर्लोकात्परलोके च पामरे' इति विश्वः । अज्ञ इति यावत् । परेषु असतः अविद्यमानानपि दोषान्पश्यति विचारयति । सतो विद्यमानानपि गुणान्न पश्यत्येव । इदं स्वस्मिन् विपरीतं पश्यति । अविद्यमानान् गुणान् पश्यति विद्यमानान् दोषान्न पश्यतीत्यर्थः । इदमन्यथा दर्शनं

नीविशब्दार्थः । सुभाषितमेव नीवी सा परगुणचोरैः परेषां कव्यन्तराणां ये गुणाः सन्दर्भविशेषा अर्थकल्पनाविशेषाश्च तेषां चोरैः तस्करैः महाकविकल्पनां वदद्भिः कव्याभासैरित्यर्थः । अहार्यार्था भवति अपहर्तुमशक्योऽर्थो यस्यास्तादृशी भवति । नीवी यथा मुद्राकरणेनानपहार्यार्था भवति तद्वदेतत्प्रबन्धश्लोका अपि तुल्याभिप्रायकव्यन्तरावलोकितत्वात् कव्याभासैस्स्वकृतत्वेन वक्तुमशक्या इत्यर्थः । यद्वा प्रमितिश्च परिष्कृतिश्च मुद्रा च प्रमितिपरिष्कृतिमुद्राः । नीव्याः प्रमितिः अर्थसङ्ख्यानिर्धारणम् । परिष्कृतिश्चारुत्वसम्पादना चित्ररसभावालङ्काराद्याविष्करणम् । मुद्रा वक्तृकल्पितेऽर्थे अन्योल्लिखितत्वशङ्कानिरासाय एतदुल्लिखितोऽयमर्थ इति मनस्यवधारणम् । ताः अस्याः सन्तीति तादृशी । अर्शआद्यच् । उत्तरार्धस्य पूर्वार्धेन समर्थनात् काव्यलिङ्गमलङ्कारः ॥ 'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्' इति तल्लक्षणात् ॥ २ ॥

पश्यतीति ॥ जनः परेष्वसतोऽपि दोषान् पश्यति सतोऽपि गुणान् न पश्यति । स्वस्मिन्नदं विपरीतं भवति । इदं दर्शनं विद्यमानानपि दोषान् न विषयीकरोति अवि-

यत्र पयःप्रभृति स्वं भुक्त्वा-सत्यानुषक्तधीश्चोरः ।
पशुवृत्तिगणे तस्मिन्नपि नाम यशोदया-वृत्तम् ॥ ४ ॥

तमोमूलाज्ञानमूलमित्याह—महिमा मोहाञ्जनस्यैष इति । लोके हि अञ्जनं भूतलादिच्छन्नं विद्यमानं वस्तु साक्षात्कारयति अदृश्याञ्जनं परेभ्यस्तद्धारिणं विद्यमानमेवादृश्यं करोति यथा मण्डूकवसाञ्जनादिकं वंशोरगत्वाद्यविद्यमानमपि दर्शयति । एवं मोहाञ्जनमात्मन्यविद्यमानान् अपि गुणान् दर्शयति परेषु विद्यमानान् गुणान्न दर्शयतीति अज्ञानेऽञ्जनत्वारोपः । तत्र प्रतिनियतविपरीतदर्शनहेतुत्वात् लोकसिद्धाञ्जनापेक्षया वैलक्षण्यं तद्वाक्यार्थसमर्थनार्थत्वात् काव्यलिङ्गालङ्कारः । 'राजन् सर्षपमात्राणि परच्छिद्राणि पश्यति । आत्मनो मेरुमात्राणि पश्यन्नपि न पश्यति ॥' इत्यादि स्मारितम् । स्वदोषस्य स्वज्ञातत्वेऽपि निर्दोष इव अभिनयसीत्यर्थः ॥ ३ ॥

यो यदीयं क्षीरान्नादिकं भुक्त्वा तद्विषये द्रोहमाचरति तस्मिन् कृतघ्ने ज्ञानिनि कीर्तिः करुणा सदाचारश्च नास्ति इत्यमुमर्थं श्लेषेण सनिदर्शनमाह—**यत्रेति** ॥

द्यमानानपि विषयीकरोतीत्यर्थः । सत्यामपि सामग्र्यां सदर्थादर्शने किं प्रतिबन्धकम् असदर्थदर्शने च को दोषः कारणमित्यपेक्षाय माह—महिमा मोहाञ्जनस्यैष इति । मोह एवाञ्जनं मोहाञ्जनं तस्यैष महिमा यत् सत्यामपि सामग्र्यां सदर्थदर्शनप्रतिबन्धः असदर्थदर्शनोत्पत्तिश्च । ननु मोहो नाम भ्रमः तस्य सदर्थदर्शनप्रतिबन्धकत्वेऽपि असदर्थदर्शनदोषतयापि कारणत्वं न सम्भवति आत्माश्रयादिति चेन्न । भ्रमान्तरस्य कारणतासम्भवात् वह्निभ्रमे धूमभ्रमस्येव जातमात्रावस्थवाचिनाञ्जनशब्देन ब्रह्मरूपमोहकारणं सूचितम् । 'कश्चिदज्ञानसंमोहःप्रनष्टस्ते धनञ्जय' 'यदा किञ्चिदज्ञोहं गज इव मदान्धस्समभव' मित्यादिषु सद्गुणरूपसमर्पणस्य मोहनिवर्तकत्वं द्रष्टव्यम् । 'तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः । यदा किञ्चित् किञ्चिद्बुधजनसकाशादधिगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥' इत्यादिषु .....र्तकत्वं द्रष्टव्यम् । मोहस्याञ्जनत्वेन रूपणात् गुणदोषानुमितिकरणस्य..... ॥ ३ ॥

यत्रेति ॥ .....पशुवृत्तिगण इत्येतद्विशेष्यम् । पशूनां वृत्तिरिव वृत्तिर्येषां ते पशुवृत्तयः निद्राहारविहारमात्रपराः धर्माधर्मविवेकशून्या इत्यर्थः । यत्र पशुवृत्ति-

हरिकरपुष्करहंसं हारमणीनां प्रसूतिमिव लक्ष्म्याः ।
पित्तेन पाञ्चजन्यं पीतं पश्यन् भिषज्यतु कम् ॥ ५ ॥

यत्र यस्मिन् पशूनां स्थितिरिव स्थितिः येषां तेषां गणे समूहे विद्यमान इति शेषः। पयःप्रभृति स्वं भुक्त्वा क्षीरादिद्रव्यं भुक्त्वा चोरस्सन्नसत्यानुषक्तधीर्भवति । तस्मिन् समूहे यशः गुणवत्त्वप्रसिद्धिः दया करुणा सद्वृत्तिः सदाचारः अपि नाम भवन्ति किम् । अत्र बुद्धिसम्प्रतिपत्यर्थं श्लेषेण निदर्शयति । चोरः कृष्णः पशूनां वृत्तिः स्थितिः यस्मिन् तस्मिन् गणे नन्दव्रजे पयःप्रभृति स्वं भुक्त्वा असत्यानुषक्तधीः सत्यभामासक्तबुद्धिर्न भवति । तदानीं सत्यभामाविवाहाभावात् । तस्मिन् गणे यशोदया कृष्णमात्रा वृत्तं वर्तनम् । अपि नाम भवेत् । पूर्वत्र गर्हायामपिः इह सम्भावने । यद्वा तत्र गणे गोव्रजे यशोदया वृत्तमपि नाम भवेत् किं न भवत्येव यशोदया गृहे वर्तमानत्वात् इति भावः ॥ ४ ॥

हरीति ॥ हरेः करपुष्करे हस्तारविन्दे हंसमिव स्थितम् । अनेन धावल्योक्तिः । लक्ष्म्याः हारमणीनां प्रसूतिमिव कारणमिव स्थितम् । अनेनातिधावल्योक्तिः ।

गणेऽन्तर्भूतः सर्वोऽपि जनः स्वमेव पयःप्रभृति भोज्यजातं भुक्त्वापि अनृतवदनचौर्ययोरापन्नानामिव शरीरधारणार्थमनपेक्षितत्वेपि इति भावः । असत्ये अनृतवदने अनुषक्तधीर्भवति चोरश्च भवति तस्मिन् पशुवृत्तिगणे यशोदयावृत्तमपि नाम । यशश्च दयाच यशोदये ते एव वृत्तं यशोदयावृत्तं वृत्तमात्मगुणः तदपि नाम अस्ति किमित्यर्थः। इति प्रस्तुताविवेके वर्ण्यमाने कश्चिदप्रस्तुतोऽप्यर्थस्स्फुरति। तद्यथा--पशुभिः गोमाहिष्यादिभिः वृत्तिर्जीवनं येषां ते पशुवृत्तयः गोपाला इत्यर्थः। तद्गणे यस्मिन् पयःप्रभृति स्वंधनं भोग्यभूतमुपभुज्य सत्यभामासक्तबुद्धिः श्रीकृष्णः नवनीतचौर्यादिलीलामाचरन्नास्त तस्मिन्नेव गोपसमूहे कृष्णमात्रा यशोदयापि वृत्तं स्थितमित्ययं समासोक्त्यलङ्कारः । गुरुभिराशिक्षितबुद्धीनां यशोदयाद्यात्मगुणानुदयात् गुरूपस्थाप्यधर्मशिक्षावृत्तशिक्षा सम्पादनीयेति भावः ॥ ४ ॥

हरीति॥ हरिकर एव पुष्करं पद्मं तत्र हंसभूतं हंसवत् भासमानं लक्ष्म्या हारमणीनां प्रसूतिमिव अवदाततातिशयेन मुक्ताफलानामुत्पादकमिव भासमानं पाञ्चज-

स्फटिकस्स्वभावशुद्धस्स एव सन्वहति सर्वमारोपम् ।
भवति न तत्रानास्था तदुपाधिषु वा भवत्यास्था ॥ ६ ॥

कारणगुणा हि कार्यगुणानालम्बन्ते इति न्यायात् । पाञ्चजन्यं भगवच्छङ्खं पित्तेन स्वनयनगतपैत्त्यदोषेण पीतं पश्यन् अज्ञ इति शेषः । कं भिषज्यति भिषजं करोति स्वदोषनिवर्तकमिच्छति । न कमपीत्यर्थः । भिषक् चिकित्सायामित्यस्मात् कण्ड्वादित्वाय्यक् । स्वदोषमजानन् पीतशङ्ख इति मनुते । न स्वदोषनिवर्तनाय प्रयतते । एवमनात्मज्ञोऽपि स्वाज्ञानादिनिवर्तनाय सत्सहवासादिकं न करोति । परन्तु देहात्मैक्यादिकमपि मनुते अहो किमस्यानिपुणतेत्यर्थे प्रस्तुते तद्विहाय तत्स्वरूपाप्रस्तुतार्थनिबन्धनात् अप्रस्तुतप्रशंसालङ्कारः ॥ ५ ॥

स्फटिक इति ॥ स्वभावशुद्धः स्फटिकः स एव सन् स्फटिकत्वाकारेणेत्यर्थः। सर्वमारोपं जपाकुसुमादीनां सान्निध्येन रक्तत्वाद्यारोपं सहति रक्तस्स्फटिक इत्यादिप्रतीतिविषयतां भजते । सह मर्षण इत्यस्मात् चौरादिकादाधृषीयत्वेन वैकल्पिकणिच्त्वात् णिजभावे कर्तरि लट् । अतोऽस्य परस्मैपदम् । नैतावता शुद्धस्फटिकरूपेणानुपादित्सा तदुपाधिषु उपादित्सापि नास्ति इत्याह--भवतीति ॥ तत्र शुद्धस्फटिकेऽनास्था तदर्थिनोऽनभिलाषो न भवति नायं शुद्धस्फटिकः इति तत्परित्यागबुद्धिर्न भवति । तदुपाधिषु जपाकुसुमादिषु आस्था वा स्वसंसर्गिणि स्वधर्मासञ्जकाः उत्कृष्टा इति तेष्वभिलाषो वा न भवति एवं स्वभावशुद्ध एवात्मा देहे-

---

न्यम् उद्रिक्तेन पित्तेन पीतं पश्यन् पुरुषः कमन्यमपि पित्तवन्तं भिषज्यतु न कश्चिदपीत्यर्थः । इत्यप्रस्तुतार्थे वाच्यविधया वर्ण्यमाने सादृश्यातिशयात् अनिर्वृत्तमोहस्यान्यमोहनिवर्तनानधिकाररूपः प्रस्तुतोऽर्थः परिस्फुरतीत्यप्रस्तुतप्रशंसा । अतस्तादृशो गुरुवरणानर्ह इति भावः ॥ 'षडिमान् पुरुषो जह्यात् भिन्नां नावमिवार्णवे । अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥' इत्यादिकं द्रष्टव्यम् ॥ ५ ॥

स्फटिक इति ॥ स्फटिकस्स एव सन् स्वतः परिशुद्ध एव सन् सर्वमारोपं जपाकुसुमादिना सन्निहितेन क्रियमाणं लौहित्यभ्रमादिकं स्वभावशुद्धया निरुपाधिकया स्वच्छतया वहति । तादृशस्वभावताविधुरादेव काष्ठलोष्टादिकं न वहति । तदपि तथापि तत्र स्फटिके निर्मलस्फटिकार्थिनां बुद्धिमतां अनास्था न भवति । नैर्मल्यनिश्चयाभावो न भवति तदुपाधिषु जपाकुसुमादिषु आस्था वा न भवति ।

स्थलपरिशेषितजलधेस्सविधे सञ्जातडम्बरं जलदम् ।
प्रहसन्ति पाण्ड्यनद्यश्शुक्तिमुखैर्मौक्तिकस्त्यानैः ॥ ७ ॥

न्द्रियत्वाद्यारोपं सहते । नैतावता देहेन्द्रियादयः उपादेयाः आत्मैवोपादेयः । एवं ज्ञानाभावेऽनिपुणतैवेति भावः । पूर्ववदलङ्कारः ॥ ६ ॥

स्थलेति ॥ पाण्ड्यनद्यः ताम्रपर्ण्याद्याः स्थलमात्रपरिशेषितजलधेः अगस्त्यस्य समीपे सञ्जातडम्बरं जलदं त्वया समुद्राः पीताः मयापि समुद्रोदकं पीतमिति गर्जन्तमिव स्थितं मेघं वीक्ष्य मौक्तिकैः स्त्यानैः निबिडैः शुक्तय एव मुखानि तैः प्रहसन्तीवेत्युत्प्रेक्षा । तत्र चतुष्टयासाधारणपाण्डित्यवन्निकटे यत्किञ्चित् उपन्यासैः गर्जन्तं पण्डितमानिनं सर्वेऽपि परिहसन्ति गूढरत्न जानातीति भावः ॥ ७ ॥

नैर्मल्यनिश्चयो न भवति इत्यप्रस्तुते वर्ण्यमाने सादृश्यात् बुद्धिमतां सत्पुरुषेषु दुरात्मभिः दोषारोपे क्रियमाणेऽपि निर्दोषत्वनिश्चयाविनाशरूपः प्रस्तुतोऽर्थः परिस्फुरति । आरोपकृत्सु निर्दोषनिश्चयानुपपत्तिश्च स्फुरतीत्यप्रस्तुतप्रशंसा । दुष्टवचनान्यनादृत्य सत्पुरुषा आदर्तव्या इति भावः ॥ ६ ॥

स्थलेति ॥ स्थलपरिशेषितजलधेः सविधे सञ्जातडम्बरमित्यसाधरणधर्मोक्त्या अगस्त्यस्येति विशेष्यं गम्यते । तस्य सविधे सञ्जातडम्बरं सञ्जातगर्जितं दर्पजो विकारो डम्बरशब्दार्थः "हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नमित्यादौ गर्भिताभ .....विकारत्वेन शब्दार्थता । तादृशं जलदं पाण्ड्यनद्यः मौक्तिकस्त्यानैः शुक्तिमुखैः प्रहसन्ति । शुक्तय एव मुखानीति रूपकम् । शुक्तिमुखपदाभ्यां वर्ण्योपमानद्वयमुपात्तम् प्रहसन्तीत्यत्र शुक्तिप्रकाशरूपं वर्ण्यमनुपादाय हासरूपमुपमानमात्रमुपात्तम् । त्रिभिरपि पदैः त्रिषु वर्ण्येषु मौक्तिकस्त्यानैरित्यत्र वर्ण्यमात्रमुपात्तम् । तत्त्वारोपस्तु आरोपान्तरसाहचर्यात् विवक्षित इति.....गम्यते । प्रहसन्तीत्यत्र शुक्तिप्रकाशरूपं वर्ण्यमनुपादाय हासरूपमुपमानमात्रमुपात्तम् । त्रिभिरपि पदैः त्रिषु वर्ण्येषु सादृश्यातिशयात् तत्तदुपमानारोपः क्रियत एव तस्मात्सावयवरूपकातिशयोक्त्यलङ्कारः । अयञ्चाप्रस्तुतार्थमात्रविश्रान्तः । अगस्त्यसमीपे जलदानां पाण्ड्यनद्यापरिहास्यत्वरूपेणाप्रस्तुतार्थेनात्युत्कृष्टसमीपे किञ्चिदुत्कृष्टस्य गर्वितस्य सर्वलोकोपहास्यत्वरूपः प्रस्तुतार्थसादृश्यातिशयात् सूच्यत इति प्रस्तुताप्रस्तुतार्थद्वयस्यापि...न्य ...प्रस्तुतप्रशंसैव प्रधानभूता । रूपकस्य यावन्तो भेदाः तावन्तो भेदाः रूपकाति-

प्रतिपन्नवामदृष्टिः स्तन इव कश्चित् समुन्नतोऽप्यधिकम्।
पतनमधिगम्य समये परिहासरसावहो भवति ॥ ८ ॥

प्रतीति ॥ कश्चित् दुर्जनः प्रतिपन्नवामदृष्टिः प्राप्तविषमदृष्टिः स्तन इव ऐश्वर्यादिमत्तस्सन् सदसद्विभागानादरेण सर्वत्र कुटिलवृत्तिमाचरन्नित्यर्थः। अधिकम् अत्यन्तं समुन्नतोऽपि ऐश्वर्यादिसमृद्धोऽपि समये दुष्कर्मविपाकसमये पतनमधिगम्य पतनान्तास्समुच्छ्रया इति न्यायेन हानिं प्राप्य स्तन इव परिहासरसावहो भवति। अयं गर्वितः सर्वान् परिभूयेदानीं सर्वैरतिपरिभूयमानस्सन् हास्यास्पदः भवतीति भावः। स्तनपक्षे प्रतिपन्नः आश्रित वामदृष्टिः स्त्री येन स तथोक्तः इत्यर्थः। स्पष्टमन्यत्। स्तन इवेत्युपमया बीभत्सरसो व्यज्यते। तेन कादाचित्कैः अल्पकालवर्तिभिरतितुच्छैः कालान्तरे नृपतस्करादिपीडाप्रापकैः ऐश्वर्यादिभिः किमर्थं मदितव्यमिति जुगुप्सा गम्यते। 'विद्यामदो धनमदः तृतीयोऽभिजनो मदः। मदा एतेऽवलिप्तानामेत एव सतां दमाः' इत्युक्तम्। बहुधाऽप्युपकारके स्वदोषाच्छादकेऽस्य प्रसिद्धिसम्पादके मित्रे प्रत्युपकर्तव्यम्। तदभावे महान् दोषः अत एव भगवता राम-

---

शयोक्तिरपि सन्तीति कुवलयानन्दे। सावयवरूपकमपि रूपकविशेष एव। विषयानुपादानात् रूपकातिशयोक्तिः। अत्र "त्वत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगाम् इत्यादाविव गम्योत्प्रेक्षात्वमनाशङ्कनीयम्" "रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी" इत्यादाविव हेतुवाचकपञ्चमीतृतीयाद्यभावेन हेतूत्प्रेक्षात्वाभावात्। "मध्यः किं कुचयोः धृत्यै बद्धः कनकदामभिः" इत्यादाविव.....चतुर्थीतुमुनाद्यभावेन फलोत्प्रेक्षात्वाभावात् "धूमस्तोमं तमदशङ्के कोकीविरहशुष्मणाम्" इत्यत्रेव वर्ण्यानुपादानेन उक्तास्पदवस्तूत्प्रेक्षात्वाभावात् "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" इत्यत्रेवानुक्तास्पदवस्तूत्प्रेक्षाया इवादिपदाभावादिह गम्यत्वस्वीकारे ततः पृथग्भूतरूपकातिशयोक्तिर्न सिध्येत्। "पश्य नीलोत्पलद्वन्द्वात् निस्सरन्ति शिताश्शरा" इत्यत्रापि इवादिपदाभावेऽपि न त्वेतद्वीक्षणेषु उत्पलत्व.....कोटिकसम्भवे सङ्कीर्णोदाहरणालाभात् ॥ ७ ॥

प्रतीति ॥ प्रतिपन्नवामदृष्टिः प्राप्तवक्रदर्शनः कश्चिदविख्यातः..... समुन्नतोऽपि जनबहुमत्या गर्वितोऽपि समये पण्डितसन्निधानदशायाम्। पतनं गर्वध्वंसमधिगम्य परिहासरसावहो भवति भ्रान्तत्वनिश्चयेन सर्वेषां हास्यो भवति।

बहु विदधत्युपकारान् गुप्त्या दुरितं प्रकाशयति तेजः ।
सुहृदि विहिताहितमतिः यन्न प्रत्युपकरोति न तत् ॥९॥
एधान् दहन्ति शान्तान्येभ्यस्सिध्येयुरसितवर्त्मानः ।
अगणितनिजप्राणाशैः किमाश्रयाशैरनाश्रयमिह ॥ १० ॥

चन्द्रेण सीतावृत्तान्ताहरणोपकारिणो हनुमतस्स्वाङ्गसंश्लेषणरूपमहोपकारं कृत्वापि तत्रासन्तुष्टेनोक्तम् । 'मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे । नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति'इति ॥ ८ ॥

अतो विवेकिना प्रत्युपकाराकरणे तत्र द्वेषकरणे च आत्मनाश इत्याह-- **बह्विति** ॥ सुहृदि विहिताहितमतिस्सन् यस्मान्न प्रत्युपकरोति तत्तस्मात् अस्तिर्भवन्तिपरोऽप्रयुज्यमानोऽप्यस्तीत्युक्तेः न च भवति तस्य सत्ता नास्ति तज्जन्म वृथा प्रत्युत तस्य प्रत्यवायश्चेति भावः । 'सत्कृताश्च कृतार्चाश्च मित्राणां न भवन्ति ये । तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥' इत्युक्तम् ॥ अत्रोत्तरार्धे षष्ठोऽयं नलघूवेति षष्ठगणस्थाने लघुप्रयोगः ॥ ९ ॥

एधानिति ॥ असितवर्त्मानः दुर्मार्गवृत्तयः एभ्यः पुरुषेभ्यः सिध्येयुः लब्धसत्ताका भवेयुः तान् घ्नन्ति तानेव हिंसन्ति हन्तेति खेदे । 'हन्त हर्षविषादयोः'

स्तनो हि प्रतिपन्नवामदृष्टिः....."कामिनी वामलोचनेत्यमरः"..... तश्च समये कतिपयकालान्तमपि हासं जनयति उपमालङ्कारः । तत्वजिज्ञासुना पुरुषेण पण्डिताभासो जडजनबहुमतः पण्डितसन्निधौ प्रतारकत्वनिश्चयादनादरणीय इति भावः ॥ ८ ॥

बह्विति ॥ उपकारान् बहु विदधति कुर्वाणे गुप्त्या गोपनेन दुरितं प्रकाश्य जनान्तरासन्निधौ गुरवे दुश्चरितं बोधयित्वा पिदधति च्छादयति । "अन्यत्र न वदेत् नियमादिक्रमं रहसि बोधयेत्" इति शास्त्रार्थमनुतिष्ठतीत्यर्थः । सुहृदि शोभनमनस्के शिष्ये हितमतिः न विहितशास्त्रार्थोपदेशो न कृत इति यत्तत् न प्रत्युपकरोति शास्त्रार्थजिज्ञासया गुरुकुलवासिनि उपकारान्तरं कुर्वतोऽपि विद्योपदेशाभावः प्रत्युपकाराभाव एवेत्यर्थः ॥ ९ ॥

एधानिति ॥ असितवर्त्मानः कृष्णवर्त्मानः "बर्हिश्शुष्मा कृष्णवर्त्मा" इत्यमरः । येभ्य एधेभ्यः सिध्येयुः उत्पद्येरन् । शान्तान् शुष्कान् तानेव एधानपि

---

१. प्रकाशैः ।

नवदलपुटे कल्प्या यस्य प्रभोरपि तल्पधीः
नटपरिवृढो यस्याधस्ताच्छ्रमं शमयिष्यते ।
वटविटपिनस्याङ्कूरानन्नुत्कटपल्लवान्
स्थपुटचषकापेक्षी भिक्षुः प्रतिक्षणमीक्षते ॥ ११ ॥

इति । उपजीव्यविरोधो न युक्त इति भावः । शान्तम् एतद्दोषकीर्तनपापं शाम्यतु । "आशंसायां भूतवच्च" इति क्तप्रत्ययः । ते वर्णाश्रितनीलवत् स्वयं नश्यन्तः परान्नाशयन्ति इत्याह—अगणितेति ॥ अगणितनिजप्रणाशैः स्वोपजीव्यनाशकैः किमनाश्यं सर्वं नाश्यमेव । अत्र निदर्शनतयार्थान्तरं । असितवर्त्मानः कृष्णवर्त्मानः येभ्यो, वृक्षेभ्यस्सिद्धयेयुः वृक्षाणां परस्परसङ्घर्षणेनोत्पन्ना भवेयुः तानेव वृक्षान् घ्नन्ति दहन्ति अगणितनिजप्रणाशैः आतृणं पचते वह्निरिति स्वनाशमप्यविचार्याश्रयाशैः आश्रयमेवाश्नन्तीति एभिः किमनाश्यं किमभक्ष्यं सर्वं भक्ष्यमेवेत्यर्थः ॥ १० ॥

स्वोपकारमात्रतत्पराः केचिदज्ञानिनः सर्वमपि स्वार्थमपेक्षन्त इति अभिप्रेत्याह—**नवेति** ॥ यस्य वटस्य नवदलपुटे प्रभोस्सर्वेश्वरस्यापि तल्पधीः कल्प्या प्रतिकल्पं कल्पादौ शय्याबुद्धिः कल्प्यत इत्यर्थः । यस्य वटस्याधस्तात् नटपरिवृढः शिवः श्रम शमयिष्यते लोकान् संहृत्य श्रमं परिहरिष्यति । दक्षिणामूर्तेः **वटवृक्ष-**

दहन्ति स्वे.....काष्ठानि दहन्तीत्यर्थः । अगणितनिजप्रकाशैः असङ्ख्यातनिजतेजोभिः तैराश्रयाशैः अग्निभिरनाश्यं किमिहास्ति । उत्पादकं नाशयतः स्वाश्रयमप्यक्षतः अग्नेः सर्वमाश्यमेवेत्यर्थः । सर्वभक्षकत्वादग्नेरिति भावः । अर्थान्तरमपि प्रतीयते । असितवर्त्मानः अपरिशुद्धमार्गप्रवृत्ताः पुरुषाः एभ्यस्स्वयं सिध्येयुः लब्धविद्या भवेयुः तानेधान् स्वाभिवृद्धिहेतूनपि दहन्ति एधयन्ति इत्येधाः अगणितनिजप्रकाशैः स्वस्य ज्ञानोत्पत्तिरेतदायत्तेत्यस्मरद्भिः आश्रयाशैः स्वास्थितिहेतुभूतमेव पुरुष बाधमानैस्तैरनाश्यं किमिहास्ति एकत्र कृतं नाशितवान् पुरुषस्ततो ऽन्यत्रापि कृतं नाशयेदेव न क्वचित्तस्य कृतज्ञतासम्भव इत्यर्थः । अयं प्रस्तुतोर्थः । पूर्वोक्तस्त्वप्रस्तुतः ॥ १० ॥

नवेति ॥ यस्य वटविटपिनः नवदलपुटे अचिरोत्पन्नपल्लवान्तःप्रदेशे प्रभोरपि तल्पधीः कल्प्या वासुदेवस्य "विश्वं नारायणं देवमक्षरं परमं प्रभुम्" इति श्रुतेः । तल्पत्वधीः कर्तुमुचिता । नटपरिवृढः महानट इत्यर्थः "महेश्वरो महादेवो

---

१. पुटसापेक्षी ।

निरवधिगुणग्रामे रामे निरागसि वागसि-
स्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।
वरतनुहतिं वालिद्रोहं मनागसर्पणं
परिमितगुणे स्पष्टावद्ये मुधा किमुदासते ॥ १२ ॥

स्याधोवासित्वं प्रसिद्धम् । तस्य तज्जातीयस्य वटविटपिनः अनुत्कटपल्लवान् सम्यगविकसितदलान् अङ्कूरान् । अभीक्ष्णवलीकादिवत् अङ्कूरशब्दो ह्रस्वमध्यो दीर्घमध्यश्च । भिक्षुः स्थपुटचषकापेक्षी निम्नोन्नतपानपात्रभूतपत्रपुटापेक्षी प्रतिक्षणमीक्षते कदा विशालपर्णानि भविष्यन्ति कदा ग्रहिष्यामीति स्वप्रयोजनतत्परो भवतीत्यर्थः ॥

अनन्तकल्याणगुणगणे निर्दोषे भगवत्यपि दोषानारोपयन्तः परदूषणैकतत्पराः अल्पगुणे बहुलदोषे जने किमित्युपेक्षन्त इत्याह—**निरवधीति** ॥ निरवधिगुणग्रामे निरवधिकगुणसमूहे निरागसि निर्दोषे रामे 'बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते । सर्वलोकप्रियस्साधुरदीनात्मा विचक्षणः ॥ आर्यस्सर्वसमश्चैव बुद्धिमान्नीतिमानपि' इत्याद्युक्तेः। लोका दुर्जनाः वाच एवासयः खड्गाः तेषां स्फुरणैः जृम्भणैः विलसनैश्च, मुषिताः आलोका ज्ञानप्रकाशा बाह्यालोकाश्च, येषान्ते तथोक्तास्सन्तः वरतनुहतिं लोकहितार्थं विश्वामित्राज्ञाकृतं, वालिद्रोहमसमीक्ष्यप्रवृत्तदुष्टवालिवधं, मनागपसर्पणं खरयुद्धे तस्यात्यन्तसन्निकर्षे सति स्थलाभावेन पश्चात् पादप्रसर्पणं च, सद-

---

महानट इति" भट्टबाणः । यस्याधस्तात् श्रमं शमयिष्यति । अयमर्थः पुराणे प्रसिद्धः । विष्णुशिवप्रभृतीनामुपकारकरणक्षमस्य वटवृक्षस्यानुत्कटपल्लवान् अतिबालपल्लवानङ्कूरन् स्थपुटपुटसापेक्षी द्विगुणितं पत्रपुटमपेक्षमाणः भिक्षुः प्रतिक्षणमीक्षते अबाधेनैव महोपकारक्षमं पुरुषम् अतिक्षुद्रार्थलेशलिप्सयातिमात्रं बाधितुं मूर्खः प्रवर्तत इति प्रस्तुतार्थः ॥ ११ ॥

निरवधीति ॥ निरवधिगुणग्रामे "स तु श्रेष्ठगुणैः युक्तः प्रजानां य हिते रतः । बहिश्चर इव प्राणः बभूव गुणवत्तरः दान्तैस्सर्वप्रजाकान्तैः प्रीतिसञ्जननैर्नृणाम् । गुणैर्विरुरुचे रामो दीप्तैस्सूर्य इवांशुभि" इत्यादिना "बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते । इक्ष्वाकुभ्योऽपि सर्वेभ्यो ह्यतिरिक्तो विशाम्पते" इत्यादिना च प्रतिपादितगुणजाते निरागसि "आगोऽपराधो मन्तुश्च" इत्यमरः । तद्रहिते "न तं पश्याम्यहं लोके परोक्षमपि यो नरः । स्वमित्रोऽपि निरस्तोऽपि योऽस्य दोषमुदाह-

न्तिके सत्पुरुषसमीप एव निर्भयास्सन्तो वदन्ति दोषत्वेन कथयन्ति। परिमितगुणे स्पष्टावद्ये स्फुटापरिमितदोषे पृथग्जने मुधा व्यर्थं किमुदासते उपेक्षन्ते। वाक्कण्डूतिनिवृत्त्यै यथेच्छं दूषयितुं विषये सत्यपि तद्विहाय परमात्मनि किमिति दोषानारोपयन्ति। परमात्मन्येव दोषारोपणे किमुत सत्सु दोषारोपणमिति भावः॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य पदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीमद्वेङ्कटाचार्यसोमसुतसुतस्य श्रीश्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकाख्यायां
अनिपुणपद्धतिः प्रथमा॥

रेत" इत्युक्तदोषगन्धरहिते रामे वागसिस्फुरणमुषितालोकाः येषामालोको ज्ञानलेशः असिस्फुरणमात्रेण निरस्यते छेदनपर्यन्तं नवा स्थातुं क्षमते ते तथाविधा लोकाः जनाः सदन्तिके वरततुहर्तिं वालिद्रोहं मनाक् ईषदपसर्पणं च दोषान् वदन्ति ते जनाः परिमितगुणे स्पष्टावद्ये मुधा किमुदासते मिथ्याभूतामुपेक्षां किमर्थं कुर्यरित्यर्थः। उक्तिविरहरूपायाः उपेक्षायाः प्रतियोगिसत्यत्वमेव मिथ्यात्वम्॥ १२॥

इति सुभाषितनीवीव्याख्यायां अनिपुणपद्धतिः प्रथमा॥

दृप्तपद्धतिः ।

तदेव गृह्यतां नाम च्छागमण्डूकरासभैः ।
तिसृणां तावता हन्त मूर्तीनां किमिहागतम् ॥ १ ॥

अण्डजः पुण्डरीकेषु, समुद्रेषु जनार्दनः ।
नीलकण्ठाश्च शैलेषु, निवसन्तु न ते न ते ॥ २ ॥

दुर्विदग्धाः केचन परोत्कर्षासहिष्णवः परसाम्यलाभाय तद्धर्मानभिनयन्ति । नैतावता "सुमेरुशिखरस्थोऽपि काकः किं गरुडायते" इति न्यायेन न तदीयोत्कर्षस्सम्भवति तेषां च निकर्षस्सम्भवतीत्यभिप्रायेण दृप्तपद्धतिरारभ्यते— **तदेवेति** ॥ छागमण्डूकरासभैः तदेव त्रिमूर्तिसम्बन्ध्येव नाम गृह्यताम् । कामचारे कर्मणि लोट् । छागेनाज इति ब्रह्मणो नाम गृहीतम् "अजो विधौ कामे हले छागे रघोस्सुते" इति विश्वः । मण्डूकेन हरिरिति विष्णोर्नाम गृहीतम् । रासभेन हर इति रुद्रस्य नाम गृहीतम् । "हरो रुद्राग्निगर्दभाः इति रत्नमालायाम् । तावता तिसृणां मूर्तीनां ब्रह्मविष्णुशिवानां सम्बन्धि "न तिसृचतसृ" इति न दीर्घः । इह छागमण्डूकरासभेषु किमागतम् । तदीयब्रह्मत्वादिकं किम्प्राप्तमित्यर्थः । तन्नामधारणमात्रेण न तत्वं भवति । अतो दृप्तैः प्रसिद्धपुरुषनामधारणमात्रेण न तत्प्रसिद्धिर्लभ्यत इति भावः । यद्वा इह जगति तावता तिसृणां मूर्तीनां किमिहागतं किं न्यूनत्वमागतम् । तेषां ब्रह्मत्वाप्राप्तौ खलु न्यूनत्वं तदभावात् किमनिष्टमित्यर्थः ॥

महतां स्थानवर्तित्वमात्रेणापि न तन्माहात्म्यं लभ्यत इत्याह— **अण्डजा इति** ॥ पुण्डरीकेष्वण्डजा हंसा निवसन्तु, नैतावता पुण्डरीकवर्ती अण्डजो ब्रह्मा भवति, समुद्रेषु जनार्दनाः जन्तुविशेषा निवसन्तु, नैतावता

तदेवेति ॥ तिसृणां मूर्तीनां यन्नाम अजहर्यादिकं तन्नामैव छागमण्डूकरासभैः गृह्यतां तावता तिसृणां मूर्तीणां किमवद्यमागतम् । फलनिष्पत्तिमनालोच्यैव परपरिभवे दृप्तः प्रवर्तित इति भावः ॥ १ ॥

अण्डजा इति ॥ अण्डजाः भृङ्गहंसाद्याः पुण्डरीकेषु निवसन्तु तेन पुण्डरीकवासेन ते न भवन्ति कमलासना न भवन्ति जनार्दना भाधकाः ग्राहा इति

कामं लिखतु संस्थानं कश्चित् रूपं च भास्वतः ।
अभित्तिविहितालम्बमालोकं विलिखेत् कथम् ॥ ३ ॥
अपि सत्पथनिष्ठानामाशाः पूरयतामपि ।
अगस्त्यवृत्तिर्मेघानां हन्त मालिन्यकारणम् ॥ ४ ॥

समुद्रशायी विष्णुर्भवति । नीलकण्ठाः मयूराः शैलेषु निवसन्तु नैतावता कैलासनिवासः शिवो भवति । तदेवाह—नते नत इति । तेन तन्नाम धृत्वा तत्स्थानाक्रमणेन हंसजनार्दनमयूरास्ते न ब्रह्मविष्णुशिवा भवन्ति ॥ २ ॥

गर्ववशेन परकीयवेषधारणेऽपि परगतपाण्डित्यादिकं न सम्पादयितुं शक्यत इत्यभिप्रेत्याह—**काममिति** ॥ कश्चित् शिल्पी भास्वतस्सूर्यस्य संस्थानं विम्बं लिखतु चित्रे लिखेत् । रूपम् अरुणरूपं च लिखेत् । भित्त्या विहितं आलम्बनं यस्य स तथोक्तस्सन् न भवतीत्यभित्तिविहितालम्बः तमालोकं प्रकाशं कथं विलिखेत् भित्त्यालम्बनत्वात् बिम्बादिकं लिखेत् तेजस्त्वनालम्बनत्वात् कथं लिखेदिति भावः ॥ ३ ॥

अल्पस्य स्वसामर्थ्यान्महाजनसम्बन्ध्यसाध्यकृत्याचरणानुकरणमयशःकारणमित्यभिप्रेत्याह—**अपीति** ॥ सत्पथनिष्ठानामाकाशवर्तिनां सदाचारवतामिति

सम्प्रदायः । असुरादयो वा । समुद्रनिवासमात्रेण विष्णुतुल्या न भवन्ति । नीलकण्ठा मयूराश्च शैलनिवासमात्रेण नीलकण्ठतुल्या न भवन्ति रुद्रतुल्या न भवन्ति । अण्डजजनार्दननीलकण्ठशब्दाः व्यर्थाः । तन्नामसाम्येऽपि क्रियालेशसाम्येऽपि तादृशमाहात्म्यासिद्धिरिति भावः ॥ २ ॥

काममिति ॥ भास्वतः, ज्ञानातिशयेन भासमानस्य, पुरुषस्य, संस्थानमाकारं रूपं च कुण्डलाङ्गुलीयादिशोभाभिः भित्तिप्राये पुरुषे कश्चिद्विलिखतु । अभित्तिप्राये पुरुषे कृतसम्बन्धम् आलोकम् उत्कृष्टं ज्ञानं कथं सम्पादयेत् । अभित्त्या अभेदेन अविशेषेण ललितेषु कठिनेषु चार्थेषु कृतसम्बन्धं कथं सम्पादयेत् । भास्वतः सूर्यस्य आलोकमातपमिति चार्थः ॥ ३ ॥

अपीति ॥ अगस्त्यः सत्पथनिष्ठः सत्पुरुषाणां पथि विहितानुष्ठाननिन्दाकरणरूपे स्थितः यथा चाशाः पूरयति समुद्रपानार्थं देवानाम् इच्छाफलानि तद्वच्छब्दमात्रसाम्येन सत्पथनिष्ठानां नक्षत्रमार्गस्थितानाम् आशाः दिशः पूरयतां

अस्तु तावदगस्त्येन जह्नोर्महिमनिह्नवः ।
का कथा तस्य बालस्य विश्वग्रासेऽप्यदृप्यतः ॥ ५ ॥
दष्टसारङ्गयूथोपि दंष्ट्रानखरवानपि ।
भूभृत्कटकसंस्थोपि सारमेयो न सिंहति ॥ ६ ॥

च गम्यते । आशाः दिशः पूरयतामपेक्षितार्थान् ददतामिति च गम्यते । मेघानामगस्त्यवृत्तिः समुद्रोदकपानं मालिन्यस्य नैल्यस्य कारणं हन्तेति खेदे ॥ ४ ॥

कश्चित् केनचित् विशेषेण अधिकोऽपि भवतु तथापि सर्वस्य सातिशयत्वात् न गर्ववता भवितव्यमित्यभिप्रेत्याह—**अस्त्वति** ॥ जह्नुमुनिना गङ्गा पीता तदेवाश्चर्यमभूत् अगस्त्येन सकलसमुद्रान् करतलपुटगतान् कृत्वा पिबता जह्नोर्महिमनिह्नवः तावदस्तु ततोऽप्याश्चर्यावहमिदमद्भुतचरित्रं तिष्ठतु । विश्वग्रासेऽपि प्रलये सर्वं ग्रसित्वापि अतृप्यतस्तस्य बालस्य प्रसिद्धस्य वटपत्रशयिनः का कथा । तन्महिम्नि किं वक्तव्यम् । ततोऽप्यत्यद्भुतमिदमतस्तद्विचार्य न दर्पेन भवितव्यमिति भावः ॥ ५ ॥

कतिपयधर्ममात्रेणान्यसाम्यं न लभ्यत इत्याह—**दष्टेति** ॥ दष्टसारङ्गयूथो मृगयूथो गजयूथश्च येन स तथोक्तः दंष्ट्रा नखराश्चास्य सन्तीति तथोक्तः भूभृत् कटकं राजशिबिरं, पर्वतनितम्बश्च ; तत्र रूस्थः स्थितोऽपि "सुपिस्थ" इत्यत्र सुपीति योगविभागात् कर्तरि कः स्थ इत्यस्यारम्भसामर्थ्यात् भावे विधानात् ।

छादयतामपि मेघानामगस्त्यवृत्तिः समुद्रजलपानरूपमगस्त्यानुकरणं मालिन्यकारणम् । कृष्णवर्णकारणम् हन्तेति खेदे । शक्यैः कर्मभिः कतिपयैः महापुरुषानुकरणस्य दोषत्वेऽपि अशक्यकर्मविशेषानुकरणमयशःकारणमिति भावः ॥ ४ ॥

अस्त्वति ॥ जह्नुर्महिमातिशायितोऽप्यगस्त्यस्य महिमा भगवन्महिम्नोऽपकृष्टः यथा, तथा भगवद्व्यतिरिक्तस्य सर्वस्यापि सर्वातिशायित्वाभावेन परस्वभावानालोच्य तज्जये तच्चरितानुकरणे धीमता दर्पेण न प्रवर्तितव्यमिति भावः ॥५॥

दष्टेति ॥ सिंहो यथा दष्टसारङ्गयूथः निहतमत्तगजयूथः, दंष्ट्रानखरवान्, भूभृत्कटकसंस्थः पर्वतनितम्बस्थश्च, तथा सारमेयः दष्टसारङ्गयूथोऽपि, दंष्ट्रानखरवानपि, भूभृत्कटकसंस्थोऽपि, राज्ञां सेनानिवेशे स्थितोऽपि, न सिंहति सिंहवन्नाचरति । "सारङ्गश्वातके भृङ्गे च सतमङ्गजे" इति विश्वः । साधनसाम्येऽपि तत्कृतबहुम-

सत्पथं च्छादयन् मित्रमजव्यालस्तमोमयः ।
अतीतपर्वा जगतामदृश्यस्सहसा भवेत् ॥ ७ ॥
धुर्याणामपि सत्कार्ये गुणशालिविमर्दिनाम् ।
अनागमविदां युक्तमपनीतेर्निवारणम् ॥ ८ ॥

सारमेयः शुनको न सिंहति सिंह इव नाचरति 'सर्वप्रातिपदिकेभ्यः क्विब्वा" इति आचारे क्विप् ततो धातुत्वाल्लट् ॥ ६ ॥

मित्रमतिकामन् शुभान्यलभमानो नष्टो भवेदित्यभिप्रेत्याह—**सदिति** ॥ सत्पथं सन्मार्गवर्तिनमाकाशवर्तिनं च, मित्रं सहायं सूर्यं च च्छादयन्, तमोमयः तमःप्रचुरः राहुरूपश्च, "तमस्तु राहुस्स्वर्भानुरित्यमरः । अजव्यालः क्रूरस्सर्पश्च' व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । अतीतानि पर्वाणि उत्सवा यस्य तथोक्तः शुभरहित इत्यर्थः । अतीतं पर्व अमावास्यारूपं यस्य स इति च सहसा अदृश्यो भवेत् नष्टो भवेत् अप्रत्यक्षो भवेत् च ॥ ७ ॥

दुर्मार्गाणां त्याग एव युक्त इत्याह—**धुरिति** ॥ सत्कार्ये समीचीनप्रयोजने धुर्याणां धुरन्धराणामपि धुरं शकटावयवं वहन्तीति धुर्याः तेषामपि च धुरोयड्ढ-

---

तिसाध्ये कर्मान्तरे साम्याभावात् प्रकृतोत्कृष्टकर्मान्तरे तज्ज्ये वा दर्पेण न प्रवर्तितव्यमिति भावः ॥ ६ ॥

सदिति ॥ सत्पथे सत्पुरुषाणां मार्गे वर्तमानं सुहृदं छादयन् तत्कृतमुपकारम् अप्रकाशयन् तमोमयः तमोगुणप्रचुरः व्यालः दुष्टः अतीतपर्वा लङ्घितमर्यादः जगतां सहसा अदृश्यः द्रष्टुमनर्हः भवेत् । तस्मात् मित्रकृतमुपकारं प्रकाशयेत् । प्रतिकूलो न भवेत् । तामसी वासनानिवर्तनीयामर्यादा न लङ्घनीयेति भावः । अर्थान्तरं प्रतीयते सत्पथे नक्षत्रपथे वर्तमानं मित्रं सूर्यं छादयन् तमोमयः तमः राहुः स्वार्थे मयट् अन्धकारप्रचुर इति वा । व्यालस्सर्पः राहुः अतीतपर्वकालस्सहसा जगतामदृश्यो भवेत् अमावास्यावसाने द्रष्टुमशक्यो भवेत् । "सुवर्भानुरासुरसूर्यं तमसाविध्यत्" इति श्रुतिः ॥ ७ ॥

धुरिति ॥ धूर्भारः प्रयाससाध्यं कार्यमित्यर्थः । तद्वहतामपि सत्कार्यगुणशालिविमर्दिनां सन्तश्शोभनाः कार्यगुणाः दर्शपूर्णमासादयोदयादयश्च तद्वतो विमृ-

---

१. सत्पथे ।

बलोत्तरेण हरिणा नागमल्लविभेदिना ।
सृगालस्साम्यमाकाङ्क्षन् शौर्याधिक्यं न विन्दति ॥ ९ ॥

कावितियत्प्रत्ययः । गुणैश्शालन्ते प्रकाशन्त इति गुणशालिनः । "शाङ्क्ष्ळाघायां" इति धातोर्तिनिप्रत्यये लडयोरभेदव्यपदेशमाश्रित्य लकारप्रयोगः । तान्विमर्दयन्ति पीडयन्तीति विमर्दिनस्तेषां गुणेनावृत्या शालीनि व्रीहिसस्यानि विमर्दयन्ति भक्षयन्तीति तथोक्तास्तेषामिति च । अनागमविदां शास्त्रानभिज्ञानां पुनरागमनमजानतां चापनीतेरपन्यायाद्धेतोरपसारणाच्च, निवारणं युक्तम् । अत्र दृष्टेषु सस्यलुण्ठाकवृषभव्यवहारप्रतीतेस्समासोक्तिः ॥ ८ ॥

बलेति ॥ बलोत्तरेण बलाधिकेन बलभद्रानुजेन च । नागमल्लविभेदिना गजश्रेष्ठभेदिना कालीयचाणूरमल्लविभेदिना च । हरिणा सिंहेन कृष्णेन च । सृगालो जम्बुको राक्षसश्च । पौण्ड्रकवासुदेव इत्यर्थः । "सृगालो दैत्यजम्बुकावितिः, रत्नमाला ।" सृगालो जम्बुके दैत्य, इति विश्वश्च । साम्यमाकाङ्क्षन् शौर्याधिक्यं शौर्यातिशयं शौरेराधिक्यं च न विन्दति । अत्र क्षुद्रो गर्ववशात् महद्भिस्सङ्घर्षं वशीकुर्वन्

द्भन्ति बाधन्त इति सत्कार्यगुणशालिविमर्दिनः तेषामनागमविदाम् अविदितशास्त्राणां परिगृहीतपक्षसाधनसमर्थानां सद्रूपं यत्कार्यं घटादिरूपादिगुणशाली च तद्विमर्दिनाम् असन्नेव घटादिर्निर्गुण उत्पद्यत इति पक्षावद.....म्भेन युक्त्याभासैः बाधमानानां सदेव सौम्येदमग्रह आसीदित्यादि सत्कार्यवादं कथमस्तस्सञ्जायते इत्यसत्कार्यवादनिरासञ्चाजानतामपनीतेरपन्यायान्निवारणं युक्तमिति ॥ ८ ॥

बलेति ॥ बलोत्तरेण सत्वाधिकेन "सत्वाधिको मृगारातिः" इत्यमरः । अवयवार्थमात्रविवक्षया शब्दान्तरप्रयोगः । नागमल्लविभेदिना गजश्रेष्ठघातिना हरिणा सिंहेन साम्यमाकाङ्क्षन् सृगालः क्रोष्टा आकाङ्क्षामात्रेण शौर्यकृतमाधिक्यं न, विन्दति ॥ अर्थान्तरं प्रतीयते ॥ बलोत्तरेण बलभद्रानुजेन नागमल्लविभेदिना नागाः कुवलयापीडकालियाद्याः, मल्लाः चाणूरमुष्टिकाद्याः तान्विदारयता हरिणा कृष्णेन, साम्यमाकाङ्क्षन् सृगालसदृशः पौण्ड्रकादिः, शौरौ कृष्णे यदाधिक्यं स्वेतरसमस्तचेतनाचेतनोत्कृष्टत्वं, तन्न विन्दति । अर्थान्तरं प्रतीयते बलोत्तरेण नागमल्लविभेदिना । अगमल्ला वृक्षश्रेष्ठाः पर्वतश्रेष्ठाश्च तान् विदारयता हरिणा रामेण साम्यं सदृशत्वं मया, सीतया साहित्यं चाकाङ्क्षन् ना सृगालः नेति नृशब्द-

सुदर्शनभृता कश्चित् अजहत्कीर्तिमत्सरः ।
महाशान्तपदाकर्षी जलजन्तुर्निगृह्यते ॥ १० ॥

तदुत्कर्षं न प्राप्नोति इत्यर्थे वर्ण्यमाने अप्रस्तुतसिंहजम्बुकवृत्तान्तो वर्णितः । तथ हरिपोण्ड्रकवासुदेववृत्तान्तोऽप्यप्रस्तुतो वर्णित इति अप्रस्तुतश्लेषमूलको अप्रस्तुत प्रशंसालङ्कारः ॥ ९ ॥

एतादृशो दृप्तः केनचित् प्रभुणा निगृह्यत इत्याह—**सुदेति** ॥ सुदर्शनभृत सौम्यदर्शनवता चक्रधरेण च अजहदपरित्यजन्, कीर्तौ परकीययशसि, मत्सरं द्वेषो, यस्य स तथोक्तः, नक्रपक्षे, अजहत्, कीर्तिमत् सर, इति, पदत्रयं कीर्तिमत् कर्दमवत् सरः, अजहत्, अत्यजदित्यर्थः "नाभ्यस्ताच्छतुः" इति शतुर्नुमभावः । "कीर्तिः प्रसादयशसोः विस्तारे कर्दमेऽपि च" इति विश्वः महाशान्तानां साधुजनानां पदाकर्षी स्थलापहारकः गजेन्द्रपदाकर्षी च । जलजन्तु जडजनः, नक्रश्च । निगृह्यते ॥ प्रकृताप्रकृतश्लेषालङ्कारः ॥ १० ॥

स्य प्रथमैकवचनान्तरूपं । तस्मिन् मृगालत्वारोपो व्यस्तरूपकं । शौर्यकृतमाधिक्य न विन्दति यदन्तर सिंहमृगालयोः घन इति स्मारितं सज्जनप्रसिद्धतारतम्यमना दृत्यापि मोघेच्छाजनकत्वाद्दर्पो महादोषो बलतः परिहर्तव्य इति भावः ॥ ९ ॥

सुदेति ॥ अजहत्कीर्तौ अनश्यद्यशसि मत्सरो द्वेषो यस्य सः महाशान्तान काष्ठागतशान्तिगुणनिष्ठानां पदं स्थानं श्रीरङ्गादिकम् आकर्षति बाधत इति महाशान्तपदाकर्षी जडः सन्तो न बाधितव्या इति विवेकरहितः जन्तुः जातमा त्रावस्थः गुरुभिरशिक्षितः कश्चित् स्वपक्षस्थापनासमर्थतया प्रसिद्धः प्रबोधचन्द्रो दयकारादिः सुदर्शनभृता उपपत्तिमत्तया शोभनं रामानुदर्शनं बिभ्रता एतद्ग्रन्थकृतैः निगृह्यते । अर्थान्तरं प्रतीयते । कीर्तिमत्पङ्कवत्सरः अजहत् "नाभ्यस्ताच्छतुरिति नुमागमाभावः । महाशान्तस्य तन्नाम्नो गजस्य पदं चरणमाकर्षतीति तथोक्तः कश्चित् जलजन्तुः ग्राहः सुदर्शनभृता चक्रभृता भगवता निगृह्यत इति । अर्थान्तरं च महाशान्तानां सतां पदं स्वभावः चक्रादिलाञ्छनोर्ध्वपुण्ड्रधारणनिवेदितभोजनादिकम् आकर्षति युक्तयाभासैः दूषयतीति तथोक्तो जलजन्तुः कश्चित् सुदर्शनभृता चक्रादि लाञ्छनभृता निगृह्यते । सत्पुरुषावमानहेतुतया निग्रहप्रयोजकतया च दर्पः परिहरणीय इति भावः ॥ १० ॥

गतिर्व्योम्ना किन्तत् गरुडमभिषेकेत चटकः
पिबत्वम्भः क्षारं न खलु कलशीसूनुरलसः ।
कलः कण्ठे नादः क इव मशकः किन्नरपतिः
कथंचित् साधर्म्ये क्षिपति न हि वैधर्म्यनियमः ॥ ११ ।

दृप्तविनीतयोरत्यन्तवैधर्म्यात् कथंचित् साधर्म्यसत्वेऽपि न तुल्यतेत्यभिप्रेत्याह—**गतिरिति** ॥ गतिर्व्योम्ना गरुडस्य चटकस्य चाकाशे गमनमस्ति । तत् चटकः कलविङ्कः, गरुडमभिषेकेत किम् अभियायात् किम् । तावन्मात्रेण चटकस्य न गरुडसामर्थ्यमस्तीति भावः । अलसः उदरशूलादिरोगवान् क्षारम् अम्भः लवणमिश्रमुदकम् "क्षारो रसान्तरे धूर्ते लवणे केशजन्मनोः" इति विश्वः । तावता कलशीसूनुर्न खलु । रोगी लवणसमुद्रपायी अगस्त्यो न भवति खलु । कण्ठे कलः नादः मशकस्याप्यव्यक्तमधुरध्वनिरस्तु । तावता मशकः क इव किन्नरपतिः । इव-शब्दो वाक्यालङ्कारे । इवैवादयो वाक्यपूरणार्था इति शब्दप्रकाशिकाकारवचनात् । वैधर्म्यनियमः कथंचित् साधर्म्यं न क्षिपति । अविरोधित्वात् । नैतावता तस्यान्यदीयोत्कर्षप्राप्तिरिति भावः ॥ ११ ॥

गतिरिति ॥ चटकः कलविङ्कनामा क्षुद्रपक्षिविशेषः तस्य गरुडस्य च गतिर्यद्यपि व्योम्ना तुल्या तथापि तत्ततो हेतोः गत्याधारसाम्याच्चटको गरुडं योद्धुं अभिगच्छेत् किम् । बलसाम्यं हि युद्धायाभिगमनं प्रयोजयति नाप्रयोजनधर्मान्तरसाम्यं । लोके अभियातारो यद्धर्मसाम्यादभियान्ति तदेव पर्यालोच्याभियातव्यमिति भावः । पिबत्विति । किञ्चित् कर्म स्वचिद्वदोषमावहतीति तावन्मात्रेण तस्मिन् कर्मणि धीमता न प्रवर्तितव्यम् । किन्तु स्वशक्तिं पर्यालोच्यैव । पूर्वस्मिन्नुदाहरणे परशक्तिः पर्यालोचनीयेति सूचितम् । इह तु स्वशक्तिरपीति भेदः । किन्नरपतेः कण्ठे कलाः नादाः परस्परविलक्षणाः बहवस्सन्ति तेषां मध्येऽधिको नादो मशकेऽस्त । त्रिभ्यः पादेभ्यो निर्गलितमर्थमाह—कथंचिदिति । जलवह्न्यादीनां प्रमेयत्वादिसाधर्म्यं न हि शीतोष्ण्यादिवैधर्म्यं बाधत इति भावः ॥ ११ ॥

निमीलयतु लोचने न हि तिरस्कृतो भास्करः
श्रवः स्थगयतु स्थिरं परभृतः किमु ध्वाङ्क्षति ।
स्वयं भ्रमतु बालिशो न खलु बंभ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यते ॥ १२ ॥

दृप्तस्यासूयतया परश्रेयोऽसहिष्णुत्वेन पराङ्मुखत्वेऽपि स्वस्यैवाज्ञतावहत्वमावहतीत्यभिप्रेत्याह—**निमीति** ॥ स्वयं सूर्यासहिष्णुत्वेन लोचने निमीलयतु । भास्करः न तिरस्कृतो हि । श्रवः श्रोत्रं, कोकिलध्वनावसहिष्णुत्वेन, अङ्गुल्या स्थिरं दृढं, स्थगयतु आच्छादयतु । "स्थग आच्छादन" इति चौरादिकाण्णिच् । तावता परभृतः कोकिलः ध्वाङ्क्षति काक इवाचरति किमु । बालिशः मूर्खः । "मूर्खवैधेयबालिशाः" इत्यमरः । स्वभ्रमणेन क्षितिर्भ्रमतीति मूर्खबुद्ध्या स्वय भ्रमतु अविच्छिन्नं चक्राकारं भ्रमतु क्षितिः न बम्भ्रमीति । स्वनेत्रभ्रमणेन पृथिवी भ्रमतीति भानमात्रमिति भावः । मूर्ख इति शेषः । मुष्टिभिः नभः कदर्थयतु क्षोभयतु नभः क्षुभ्यते किं नभस्सङ्क्षोभः सम्भवति किं कथयेति भावः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य पदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीमद्वेङ्कटाचार्यसोमसुत्सुतस्य श्रीश्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकाख्यायां
दृप्तपद्धतिः द्वितीया ॥

निमीति ॥ नैषस्स्थाणोरपराधः यदेनमन्धो न पश्यतीति न्यायात् गुणास्फूर्तौ परत्र परदोषारोपः परत्र स्वदोषानुमितिभ्रमः, साधनसाधर्म्यमात्रेण असाध्ये साध्यताभ्रमश्चादर्शनप्रयुक्तः स्वस्यैव दोषः न तु दृश्यस्तथाविध इति पादचतुष्कार्थः । तस्मात् पक्षमविचार्य साधर्म्यमात्रे हेत्वाभासेन गुणदोषौ नानुवर्तनीयाविति भावः ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायां दृप्तपद्धतिः द्वितीया ॥

खलपद्धतिः ।

परचित्तैकनिरताः पुत्रादिष्वप्यसङ्गिनः ।
योगिनामनुकुर्वन्ति विशृङ्खलधियः खलाः ॥ १ ॥

परेति ॥ परेषां चिन्तायां दोषगवेषणे एकस्यामेव निरताः । शिवभागवतवत् समासः । अन्यथा चिन्तैकशब्दयोः प्रथमं समासे पूर्वकालैकेत्यादिनैकशब्दस्य पूर्वनिपातस्स्यात् । योगिविषये परस्य परमात्मनः चिन्तायामेकस्यामेव निरताः पुत्रादिष्वप्यसङ्गिनः एकत्र स्वोदरपोषणमात्रतत्परत्वेनान्यत्र वीतरागत्वेन । विशृङ्खलधियः शास्त्रीयनियमं परित्यज्य स्वतन्त्रबुद्धयः अन्यत्र विषयप्रतिबन्धरहितधियः योगिनामनुकुर्वन्ति सदृशा भवन्ति । कर्मणश्शेषत्वविवक्षायां षष्ठी । अत्यन्तविरुद्धयोरुपमानेन स्तुतिद्वारा निन्दाभिव्यञ्जिता । यथा योगिनोऽत्युत्कृष्टधर्मवत्वेन मुक्तिस्थानं तथा एतेऽत्यन्तनिन्दितधर्मवत्वेन नरकस्थानमिति किमेषां जन्मेति शोच्यत्वं प्रतीयते । "परस्त्रीषु जात्यन्धाः परदोषेष्वपुंसकाः । परीवादेषु ये मूकास्तेऽतीव दयिता मम" इति भगवद्वाक्यम् "आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् वक्ता पापमुपादत्ते क्षममाणो विमुच्यते" इत्यादिकमनुसन्धेयम्.....॥ १ ॥

परेति ॥ परेषां यच्चित्तम् इदं कर्तव्यमिति निश्चयः तस्मिन्नेव निरताः पुत्रादिष्वसङ्गिनः परोपद्रवविरोधिनं पुत्रादिसङ्गमननुवर्तमानाः विशृङ्खलधियः शास्त्रानियमितकार्यताबुद्धयः खलाः परस्य परमात्मनः यच्चित्तं विधिप्रतिषेधतात्पर्यरूपं तन्मात्रनिरतानां पुत्रादिस्नेहाप्रतिबद्धधर्मप्रवृत्तीनां यमनियमादिभिः प्रतिबन्धकदुरितक्षयात् विशृङ्खलविवेकानां योगिनां शब्दसाम्यात् वेषभाषादिभिरपि अनुकुर्वन्ति । तावन्मात्रेण ते साधव इति न भ्रमितव्यम् । दृढतरप्रमाणेन खलत्वसाधुत्वान्यतरन्निश्चित्य खलेषूपेक्षा साधुषु मैत्री च कर्तव्येति भावः..... ॥ १ ॥

---

१. चिन्तै ।

आत्मार्थं युक्तवित्तानां मित्रमण्डलभेदिनाम् ।
अतिलङ्घितलोकानां न बन्धः केनचित्क्वचित् ॥ २ ॥
स्नेहश्शैत्यं प्रसादश्च कोशत्यागश्च जायते ।
आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ॥ ३ ॥

आत्मार्थमिति ॥ आत्मार्थं स्वार्थं परमात्मसमाराधनार्थं युक्तं सञ्चितं वित्तं येषान्ते तथोक्ताः तेषां मित्रमण्डलभेदिनाम् मित्रसमूहभेदनशीलानां सूर्यमण्डलभेदिनां च, अतिलङ्घितावमानविषयीकृता अतिक्रान्ताश्च, लोका जना भूरादिलोकाश्च, यैस्ते तथोक्तास्तेषां, क्वचिदपि, केनापि, बन्धः निग्रहः यमबन्धनं च, नास्ति । अत्रापि योगिसाम्यं गम्यते । पूर्ववदभिप्रायः ॥ २ ॥

"दुर्जनस्य विशिष्टत्वं परोपद्रवकारणम् । उपोषितस्य व्याघ्रस्य पारणं पशुमारणम्" इतिवद्दुर्जनस्य गुणाः परपीडनायैवेत्याह—**स्नेहेति** ॥ असितस्तमोमलिनः आत्मा मनो यस्य स तथोक्तस्य श्यामरूपस्य च, निस्त्रिंशस्य क्रूरस्य खड्गस्य च । "तिस्त्रिंशो निर्दये खड्गे" इति विश्वः । स्नेहस्सौहार्दम् आयुधलेपनार्थ-

---

आत्मार्थमिति ॥ स्वस्य विषयोपभोगार्थमेव कर्मसु प्रयुक्तचित्तानां मित्रमण्डलं भिन्दन्ति विरुद्धाचरणेनाप्रीतं कुर्वन्तीति मित्रमण्डलभेदिनां लोकमर्यादामतिक्रम्य प्रवृत्तानां खलानां क्वचिद्गुरुपुत्रादिविषयेऽपि केन चिदपि परमोपकारेणापि बन्धः स्नेहः नास्ति (अर्थान्तरं) प्रतीयते । आत्मार्थम् "उद्धरेदात्मनात्मानं नात्मानमवसादयेत्' इत्युक्तात्मोद्धारणार्थं न शरीरमात्रपोषणार्थं युक्तचित्तानां कर्मयोगसंस्कृतचेतसां शरीरावसाने सूर्यमण्डलभेदिनाम् अग्न्यादिभिः आतिवाहिकगणैः स्वस्वलोकेभ्यः उपरितनानां देवतिर्यङ्मनुष्यस्थावराणाम् अन्यतमशरीरे केनचित्कर्मणा प्रतिषिद्धेनापि न बन्धः न स्वैरगतिप्रतिबन्धः साधुत्वासाधुत्वानुमित्यर्थं तत्तज्ज्ञापकोक्तिः ॥ २ ॥

स्नेहेति ॥ असितात्मनः कलुषितस्वभावस्य कुत्रापि स्नेहबन्धरहितस्वभावस्येति चार्थः । "षिङ् बन्धन'इति धातुः । हितोपदेशादिभिः अविच्छिन्नस्वभावस्य । 'षोऽन्तकर्मणि' इति धातुः । निस्त्रिंशस्य 'नृशंसखड्गौ निस्त्रिंशावित्यमरः' । आसन्नपरपीडार्थमेव स्नेहः अनुरागः शैत्यं मृदुवाक्यप्रयोगः प्रसादः प्रीतिव्यञ्जकं सौम्यावलोकनं कोशत्यागः बह्वर्थदानं च जायते । न तु प्रीतिबाहुल्यरूपस्वसामग्री-

---

१. चित्ता ।

जनित्वापि महागोत्रे निम्नगा वक्रचेष्टिताः ।
वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ॥ ४ ॥

द्रव्यविशेषश्च, शैत्यं सौम्यत्वं निशितत्वं च, प्रसादोऽनुग्रहः मार्जनसंस्कारकृतस्वच्छता च, कोशत्यागः धनत्यागः चर्मपिधानत्यागश्च, आसन्नानां परेषां अन्येषां शत्रूणां च पीडार्थं जायते प्रकृताप्रकृतश्लेषः ॥ ३ ॥

केचित् महाकुलोत्पन्ना अपि दुर्मार्गवृत्तिमाचरन्तीत्याह—**जनीति** ॥ महागोत्रे महावंशे महापर्वते च, जनित्वापि, निम्नगाः पूर्वकर्मानुसारेण नीचमार्गगामिनः नद्यश्च, वक्रचेष्टिताः कुटिलव्यापाराः अनृजुप्रवाहाश्च, समेषु समचित्तेषु विषमेषु दुष्टचित्तेषु च वैपरीत्यं विरुद्धाचरणं वितन्वन्ति । यश्च निम्बं परशुनेति न्यायेन सर्वत्र विरोधमाचरन्तीत्यर्थः । नदीपक्षे समदेशेषु निम्नत्वौन्नत्यादिकं विषमदेशेषु समत्वनिम्नत्वादिकं चेत्यर्थः ॥ ४ ॥

महिम्ना जायन्ते । स्नेहशब्देन तत्कार्यमुच्यते खलस्य वस्तुतोऽनुरागाभावात तस्मादेव तावपि प्रीत्यनुरागौ हेत्वाभासौ इति भावः । अर्थान्तरं प्रतीयते । असितात्मनः कृष्णवर्णस्य असिता असित्वं तदेवात्म स्वरूप यस्य निस्त्रिंशस्य खड्गस्य आसन्नशत्रुपीडार्थमेव स्नेहः तैलाभ्यञ्जनं शैत्यं शीतता तीक्ष्णधारता । प्रसादः प्रतिफलनानुगुणं नैर्मल्यं कोशत्यागः अपिधानप्रहाणञ्च जायते ॥ ३ ॥

जनीति ॥ निम्नान् नीचान् गच्छन्ती परिचिन्वन्तीति निम्नगाः वक्रचेष्टिताः अन्यदुक्त्वा अन्यत्कुर्वन्तीत्यर्थः । दुष्टाः महावंशे जनित्वापि समेषु विषमेषु चानुकूलेषु प्रतिकूलेषु च वैपरीत्यं वितन्वन्ति महावंशप्रसूतेष्वपि नीचपरिचयादिकं खलत्वानुमितिक्षमामिति भावः । अर्थान्तरं प्रतीयते । महान्तः वंशाः वेणवः यस्मिन् तस्मिन् पर्वते जनित्वापि वक्रगतयो नद्यः समदेशेषु विषमदेशेषु च वैपरीत्यं प्रतिलोमगतिं वितन्वन्ति ॥ ४ ॥

[1]उत्पथा दुर्नदाः केचित् बहुभङ्गभ्रमाविलाः ।
तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ५ ॥
केनचिद्दान्तकृत्येन कुलगोत्रविमर्दिना ।
मदेन बहुधा भिन्नं मातङ्गं मन्यते जनः ॥ ६ ॥

इदमेव मुखान्तरेणाह—**उत्पथेति** ॥ केचिद्दुर्नदाः । उत्पथाः कूलान्तस्थितिमुल्लङ्घ्योपरिगच्छन्तः उद्वृत्ताचाराश्च, बहुभिः भङ्गैः तरङ्गैः भ्रमैरावर्तैः च आविलाः कलुषास्सन्त, (अन्यत्र) बहुभिः भङ्गैः पराभवैः । "खलानां कण्टकानां च द्वयमेवोचितं मतम् । उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम् ।" इत्युक्तेः । भ्रमैः भ्रान्तिभिश्चाविलाः व्याकुला इति गम्यते । तरसा वेगेन भिन्नास्सेतवः जलनिवारणार्थबन्धाः शास्त्रमर्यादाश्च, सन्तस्तटस्थान् वृक्षानपि निघ्नन्ति उन्मूलयन्ति उदासीनभूतानपि बाधन्त इति गम्यते । श्लेषनिबन्धनेयमप्रस्तुतप्रशंसा ॥ ५ ॥

"चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः । द्विजातिमपि दुर्वृत्तं चण्डालमपि तं विदुः" । इत्यनुसृत्याह—**केनेति** ॥ दान्तं दमितं दमेर्ण्यन्तात् वा दान्तशान्तेत्यादिना निपातितः । निगृहीतमिति यावत् । तेन कृत्येन, दान्तं दन्तसम्बन्धितिर्यक्-

---

उत्पथेति ॥ उत्पथात् उत्क्रान्तपथात् शास्त्रानियमितात् उन्नताः ऐश्वर्यलाभेन गर्विताः, बहूनां पुरुषाणां भङ्गैः भञ्जनैः भ्रमैः विपरीतज्ञानैश्च आकुलाः सम्भ्रमभाजः तरसा झटिति अनालोच्यैव भिन्नसेतवः त्यक्तव्यवस्थाः केचित् हीनकुलप्रसूताः पुरुषाः तटस्थानपि पक्षपातरहितानपि निघ्नन्ति बाधन्ते । एतादृशाः दूरतः परिहार्या इति भावः । अर्थान्तरं प्रतीयते । उत्पथात् पात्रबहिर्भूतमार्गात् उन्नताः प्रसिद्धाः बहुभिः भङ्गैः तरङ्गैः भ्रमैरावर्तैश्चाकुला अनेकरूपाः तरसा वेगेन भिन्नसेतवः नाशितसेतुबन्धाः केचित्प्रवाहाः तटस्थानपि तीरगतानपि बाधन्ते । किमुत तटादन्तरावर्तीर्णानित्यपिशब्दार्थः ॥ ५ ॥

केनेति ॥ जनः केनचिद्दान्तकृत्येन असत्पुरुषो न बहून् धर्मान् करोति किन्तु कदाचित् किञ्चिदेवेति सूचयति केनचिच्छब्दः । दान्तानां नियतेन्द्रियाणां कृत्यं धर्माचरणं विवाहार्थब्राह्मणभोजनादिना केनचिद्धर्मकृत्येन कुलानि कुटुम्बानि गोत्राणि गोकुटुम्बाश्च बाधमानं धनबुद्धिधर्माचरणादिसाधनभेदात् बहुप्रकारेण गर्वेण भिन्नं विकृतिं गतं पुरुषं मातङ्गं चण्डालं मन्यते 'गुरोः कुलेन भिद्येत न ज्ञातकुल-

---

१. उत्पथादुन्नताः ।

अनेकमुखपापात्मा च्छद्मसन्दर्शिताश्रमः ।
कर्बुरप्रकृतिः कश्चित् कापेयकलहोचितः ॥ ७ ॥

दन्तप्रहाररूपं कृत्यं तेन च, कुलं ब्राह्मणकुलादिगोत्रं स्वपूर्वपुरुषपरम्परा, तद्विमर्दिना तद्विरुद्धाचरणेन, कुलपर्वतभेदिना च, मदेन गर्वेण मदोदकेन च, भिन्नं मुक्तं स्रवणवन्तं च, जनः, मातङ्गं चण्डालं गजं च, मन्यते ॥ ६ ॥

अनेकेति ॥ अनेकमुखानि पापानि यस्य स तथोक्तस्तादृशः आत्मा मनः यस्य स तथोक्तः छद्मना कपटेन लोकवञ्चनबुध्या सन्दर्शितः आश्रमः यस्य स तथोक्तः एकः "एकदण्डं समाश्रित्य जीवन्ति बहवो नराः" इत्युक्तेः । कर्बुरप्रकृतिः

बन्धुषु' इति प्रयोगानुरोधात् कुलशब्दोऽत्र कुटुंबवाचितया निर्दिष्टः । तेन न गोत्रशब्दपौनरुक्त्यम् 'असतां धर्मबुद्धिश्चेत् सतां सन्तापकारणम्' इत्यर्थे तात्पर्यं । केनचिदित्यनेन प्रमाणाप्रसिद्धत्वम् असत्पुरुषधर्मस्य सूचितम् । सद्ब्राह्मणान् परिहृत्य नटविटगायकाद्यपथप्रवृत्तसन्तर्पणं हि न केनचित्प्रमाणेन धर्मत्वेन बोध्यते । प्रत्युत प्रतिषिध्यते । 'प्रतिपादयता तीर्थे.....यता चार्तीर्थे' इत्यापस्तम्बस्मरणात् । 'न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके पापे नावेदविदि धर्मवित् ।' इति मनुस्मरणात् । 'स्वाभिप्रायकृतं कर्म यत्किञ्चिद्विधिवर्जितम् । क्रीडाकर्मैव बालानां तत्सर्वं स्यान्निरर्थकं' इति स्मृत्यनुरोधात् । मूलप्रमाणं सम्यक् परिशोध्यैव परानुपरोधेन धर्मः कर्तव्यः । न विस्मयेत तपसेति शास्त्रानुरोधात् गर्वेऽपि .....इत्यपि सूचितम् । जन इत्यनेन जातमात्रावस्थो गुरुभिरशिक्षितमतिर्यग्जातिरपीति सूचितम् । मातङ्गमित्यनेन मातङ्गनाम्नः कस्यचित् वचनकारिणः रथवाहिनं तुदतः बाध्यमानं स्वपुत्रं प्रति चण्डालत्वोपदेशावगतो वृत्तान्तः सूचितः । तथा हि । महाभारते निरुपाधिकहिंसायाः चण्डालस्वभावत्वं सुव्यक्तमुक्तम् । चण्डालशब्दस्य 'चडिकोप' इति धातुनिष्पन्नस्यावयवार्थ एव कोपकार्यस्य चण्डालस्वभावत्वं बोधयति । अर्थान्तरं प्रतीयते । केनचिद्दन्तसाध्यकर्मणा कुलाचलविभेदिनं बहुप्रकारेण मदेन विकृतं मातङ्गं गजं मन्यते ॥ ६ ॥

अनेकेति ॥ बहुमुखपापेषु कर्तव्यतानिश्चयवानयं कपटेनाश्रमं श्रमाभावं निर्व्यापारतां प्रकटयन् । कपटावबोधितब्रह्मचर्याद्याश्रमधर्मश्च, कर्बुरप्रकृतिः रजस्तमोमिश्रस्वभावः कश्चित् सत्पुरुषासम्प्रतिपन्नं कापेयस्य चपलकृत्यस्य कलहस्य च

छद्मिनं सत्कथानर्हं स्वात्मोपहतजातिकम् ।
न निगृह्णाति यः काले सोऽपि सभ्यैर्निगृह्यते ॥ ८ ॥

राक्षसप्रकृतिः कश्चित् कापेयेन अनवस्थितचित्तत्वेन कलहानां परैस्स्पर्धानां उचितः परिचयवान् भवतीति शेषः । (अन्यत्र) अनेकानि मुखानि यस्य स पापात्मा रावणः छद्मसन्दर्शिताश्रमः कर्बुरप्रकृतिः राक्षसप्रभवः कश्चित् कापेयकलहोचितः वानरयुद्धयोग्यः "कपिज्ञात्योर्ढकिति" भावार्थे कपिशब्दात् ढक् । कापेयं कपित्वं कपिजातिः तत्सम्बन्धि कलह इत्यर्थः ॥ ७ ॥

"श्रेष्ठोऽर्धं तु हरेत्तत्र भवेत्पादश्च कर्तरि । पादस्तेषु सहासत्सु यत्र निन्द्यो न निन्द्यते ॥ यथाशक्ति निगृह्णीयात् देवतागुरुनिन्दकान्" इति धर्मशास्त्रार्थं जनो निन्द्यत इत्याह—**छद्मीति** ॥ छद्मिनं कैतववन्तं स्वात्मना उपहता जातिः विरुद्धाचारेण नाशिता कुलमाचारकर्मणेत्युक्तेः । तादृशी जातिः यस्य तम् । अत एव सत्कथानर्हं सद्गोष्ठ्यामयोग्यं काले निग्रहोचितसमये यो न निगृह्णाति सोऽपि सभ्यैर्निगृह्यते । अत्र निदर्शनं । छद्मिनं केनचिदभिप्रायेण प्रयुक्तस्य शब्दस्याभिप्राया-

---

योग्यः । अर्थान्तरं प्रतीयते । अनेकमुखश्चासौ पापात्मा चेति विग्रहः । कपटेन सन्दर्शितसन्यासाश्रमसम्बन्धः कर्बुरप्रकृतिः राक्षसानां प्रकृतिरिव प्रकृतिर्यस्य सः, कश्चिद्रावणः कापेयस्य कपिसमूहस्य यः कलहः तदुचित इति ॥ ७ ॥

छद्मिनेति ॥ स्वात्मोपहतजातिकं स्वभावेनैव दूषितजातिकं 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इत्यादिना अपकृष्टजातेः उत्कृष्टजातिधर्मानाधिकृतत्वेन निन्दितत्वात् । अत एव सत्कथानर्हं सतामुत्कृष्टानां कथायाः वेदविचारादिरूपायाः अनर्हं तथापि छलिनंमन्यविषयवाक्यस्य स्वविषयत्वाध्यारोपेणोत्कृष्टजातिधर्मानाचरन्तं यो राजन्यो वा निग्रहानुग्रहयोरधिकृतः पुरुषः काले अविलम्बितकालेन न निगृह्णाति स राजादिरपि सभ्यैः निगृह्यते त्वद्दोषादयमनर्थः प्राप्त इत्याक्रुश्यते । अर्थान्तरं प्रतीयते । छलिनं कपटिनं सन्न्ययमिति कथायाः अनर्हं स्वात्मना स्ववुद्धयैवोपहतजन्मानं यं सन्निनिग्रहकाले पापित्वज्ञानसमनन्तरकालमेव न निगृह्णाति । सोऽपि सभ्यैर्निगृह्यते । छलिन वादिवाक्यस्यार्थान्तरं कृत्वा दूषणं वदन्तमप्यवधानेन यो न निगृह्णाति । निग्रहस्थानोद्भावनेन न दूषयति सोऽपि सभ्यैर्निगृह्यते । छलरूपदोषानुद्भावनात्मना निग्रहस्थानेन दूष्यते । वादिनः प्रतिवादिवाक्यगतदोषप्रति-

निगिरन्तो जगत्प्राणान् उद्गिरन्तो मुखैर्विषम् ।
दूरतः परिहर्तव्या द्विजिह्वा जिह्मवृत्तयः ॥ ९ ॥

न्तरं परिकल्प्य दूषणाभिधानं तदुन्तमसदुत्तरं जातिरिति दूषणम् । तद्धि स्वव्याघातकत्वादिरूपमतः स्वात्मोपहतजातिकमुपहतस्वात्मजातिकं नानावक्तृकवाक्यसन्दर्भः कथा सत्कथानर्हं समीचीनवादकथाया अयोग्यं काले वादकाले यो वादी न निगृह्णाति निग्रहस्थाने न दूषयति सोऽपि सभ्यैर्मध्यस्थैः निगृह्यते दूष्यते ॥ ८ ॥

निगीति ॥ "अहो खलु भुजङ्गस्य विचित्रोऽयं वधक्रमः । अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥" इत्युक्तरीत्या जगत्प्राणान् वायून् ग्रसन्तः मुखैर्विषमुद्गिरन्तः परानिष्टसूचनमुद्गमन्तः जिह्मवृत्तयः कुटिलवृत्तयः द्विजिह्वाः सूचका एव

भानं वादिनस्सभ्यनिगृह्यतायाः स्थानम् । प्रतिवादीतुस्स्ववाक्यगतदोषानुद्भावनेऽपि वादिनं निग्रहीतुं नार्हतीति तथा स्वात्मना स्वसाधारणलक्षणेनासदुत्तरत्वस्वव्याघातकत्वातिनोपहतजातिकं वादिवाक्यदूषणासमर्थकृतासदुत्तरं प्रतिवादिनं यो वादकाले न निगृह्णाति जातित्वोद्भावनेन न दूषयति स वाद्यपि सभ्यैर्निगृह्यते । स्वव्याघातकत्वं जातित्वमित्याचार्याः । असदुत्तरं जातिरिति तद्भाषा अपिशब्दः प्रतिवादिनोऽपि सभ्यनिग्राह्यतां सूचयति तथा असत्यकथानर्हं वादिनं यः प्रतिवादी न निगृह्णाति असाधुत्वोद्भावनेन न दूषयति सोऽपि सभ्यैर्निगृह्यते । अपिशब्दो वादिनोऽपि सभ्यनिग्राह्यतां सूचयति । कथा पञ्चावयववाक्यप्रयोगः तस्यास्सत्वं गुणदोषाभावश्च अनुकूलतर्कादिभावरूपसहकारिगुणः उपाधिव्यभिचारादाभावो भावरूपं कारणं दोषाभावः ॥ ८ ॥

नीति ॥ जगतां प्राणान् प्राणधारणहेतुभूतान् गृहक्षेत्रपशुधनधान्यादीन् निगिरन्तः भक्षयन्तः लोपयन्तः । तत्र हेतुमाह--विषं मुखैरुद्गिरन्त इति । बाधकत्वेन विषसदृशं पैशुन्यवाक्यं वदन्त इत्यर्थः । परस्परविरुद्धे द्वे वाक्ये जिह्वायां येषां ते द्विजिह्वाः । खलाः हि हस्तप्राप्तिपर्यन्तं न बाधिष्य इति ब्रुवते । स्वहस्तप्राप्त्यनन्तरं स्फुटमेव बाधन्ते । जिह्मवृत्ताः कुटिलव्यापाराः खलाः दूरतः परिहर्तव्याः । यावद्दूरं गतान् बाधितुं न क्षमन्ते तावद्दूरं गत्वा परिहर्तव्या इत्यर्थः । अर्थान्तरं प्रतीयते । जगत्प्राणान् वायून् निगिरन्तः भक्षयन्तः मुखैर्विषमुद्गिरन्तः

अकिञ्चित्कारिणां हीनैराकृष्टगुणकर्मणाम् ।
अघाय गतसत्वानां दर्शनस्पर्शनादिकम् ॥ १० ॥
अधिकोन्नतैरपि सुदारुणान्वितैः
असकृद्भ्रमत्पशुगणाङ्घ्रीपीडितैः ।

सर्पाः दूरतः परिहर्तव्याः । द्विजिह्वौ सर्पसूचकौ" इत्यमरः । श्लेषमूलकाभेदाध्यवसायिनबन्धनातिशयोक्त्यालङ्कारः ॥ ९ ॥

अकिञ्चित्कारिणां दुर्जनानां दर्शनस्पर्शनादिकं च पापाय भवतीत्याह— **अकीति** ॥ गतसत्वानां गतसत्वगुणानां गतासूनां च; "द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु" इत्यमरः । स्पष्टमन्यत् ॥ १० ॥

दुर्मार्गसङ्गः परिहर्तव्य इत्याह—**अधीति** ॥ अधिकोन्नतैः अत्यन्तगर्वितैः उन्नतैश्च । खलान् किलोन्नतभूमौ कुर्वन्ति । सुदारुणैः अतिक्रूरैः अन्वितैः सहवसद्भिः अन्यत्र) सुदारुणेति व्यस्तं पदं तृतीयान्तं । शोभनकाष्ठेन, पशुबन्धनार्थं निखातेन, अत एव खरे वालियूपो भवति तीरेऽप्युक्तम् असकृत् अनेकवारं पुनः पुनश्च भ्रमन्तः ये पशुगणा जनसमूहा एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्चेति

वमन्तः जिह्मवृत्तयः कुटिलगतयो द्विजिह्वाः सर्पाः दूरतः परिहर्तव्या इति । 'जगत्प्राणसमीरणाः' इत्यमरः ॥ ९ ॥

अकीति ॥ किञ्चिदप्यनुकूलमकुर्वतां दीनैः बाधिनैः अतिक्रूरोयं पीडयतीति आकृष्टगुणकर्मणां नष्टसत्वगुणानां दर्शनस्पर्शनादिकम् अघाय दुःखाय । अर्थान्तरं प्रतीयते । अकिञ्चित्कारिणां किञ्चिदपि कर्माकुर्वताम् इष्टमरणेन बन्धुभिराकृष्टगुणकर्मणामुच्चैरुक्तसद्गुणकर्मणां गतसत्वानां गतजीवानां शवानां दर्शनस्पर्शनादिकं अघाय अशुचित्वाय केवलम् । नाकिञ्चित्फलं ततः प्राप्यत इत्यर्थः ॥ १० ॥

अधीति ॥ धनधान्यादिसम्पदात्यन्तातिशयितैरपि अतिक्रूरपुरुषान्तरान्वितैः रसकृताप्रीतिजनकेन मिथ्यावचनादिना भ्रमद्भिः पशुगणैः जडस्तोमैः अङ्घ्रयोः चरणयोः पीडितैः विमर्दितैः विरसैः स्नेहलेशरहितैः स्वभावतः उपाधिं विना कठिनैः निर्दयैः खलैः दुर्जनैः विधिसिद्धनैकगुणसस्यसम्पदां न्ययागता बहुगुणसस्यसम्पत् ऐश्वर्यं येषां तेषां पुंसाम् अलं न किञ्चित्प्रयोजनं तैस्सम्भाषणादि न कर्तव्यमिति वारणार्थः अलं शब्दः । अर्थान्तरं प्रतीयते । अधिकोन्नतैः केदा-

---

१. दीनै ।

विधिसिद्धैनकगुणसस्य सम्पदां
विरसस्वभावकठिनैरलं खलैः ॥ ११ ॥
मुक्ताहारनिषेविता अपि न तद्वृत्ती दिशत्यन्तरं
बन्धे गाढविमर्दनेऽपि न जहत्यन्योन्यसंपीडनम् ।

मनुष्याणामपि पशुत्वेनाभिधानात् पशवः पाशिताः पूर्वमिति प्रयोगाच्च । तेषामङ्घ्रिभिः पीडितैः दुर्जना हि सर्वत्र प्रतिकूलाचरणेन सर्वैः पादेन हन्यते । असकृत् पीडितैरिति सम्बन्धः । विरसस्वभावेन निर्दयस्वभावेन कठिनैः दाक्षिण्यरहितैः अन्यत्रानार्द्रस्वभावाः घनीभूताः कठिनाश्च तैः, खलैः दुर्जनैः धान्यमर्दनभूमिदेशैश्च विधिसिद्धाः शास्त्रसिद्धाः नैके अनेके गुणाः सस्यसम्पद येषान्ते तथोक्तास्तेषाम् । अन्यत्र विधिसिद्धा भाग्यसिद्धा नैकगुणास्सस्यसम्पदो धान्यानि येषां तेषां च अलं प्रयोजनं नास्तीत्यर्थः । कृषिसम्पादितधान्यानामेव खलापेक्षा नान्येषामिति भावः ॥ खलैरिति करणे तृतीया । निषेधक्रियाम्प्रति करणत्वात् ॥ ११ ॥

पुनश्च ईदृशस्वभावाः खला इत्याह—**मुक्ताहारेति** ॥ कामान्तःपुरचेटिकानां मन्मथान्तः पुरचेटिकानां कुचतट्याः यत् काठिन्यं तद्वन्तः तादृशकाठिन्यवन्त इत्यर्थः अतिकाठिन्यद्योतनाय कामान्तःपुर इति विशेषणम् । तासामतिसौन्दर्येणातिकठिनकुचत्वादिदं मतिशयोक्तिरूपं । खला दुर्जनाः मुक्ताहारैःमुक्तजीवनैः अविद्यमानजीवनैः निषेविता अपि तद्वृत्त्यै तज्जीवनाय अन्तरमवकाशं न दिशन्ति । कुचाश्च मौक्तिकहारैर्निषेविताः तद्वृत्त्यै मुक्ताहारस्थित्यै अन्तरं न दिशन्ति परस्परश्लिष्टत्वादिति भावः । बन्धे कारागृहादिबन्धे गाढविमर्दने जानुभिः मुष्टिभिस्सम्यक् ताडने

राद्यपेक्षया अत्यन्तोन्नतैः मेधिसंज्ञकेन शोभनदारुणा काष्ठेनान्वितैः असकृत् पौनःपुन्येन भ्रमतः पशुगणस्याङ्घ्रिभिः पीडितैः विरसैः निर्जलैः प्रकृत्या कटिनैः दृढतरैः खलैः धान्यपलालविवेचनदेशैः विधिसिद्धानां व्यापारेण साधितानां नैकगुणानां बहुविधरूपरसादीनां सस्यसम्पदां सम्पन्नसस्यानाम् अलं पर्याप्तं धान्यसिध्यर्थो व्यापारनिश्चयस्समाप्त इत्यर्थः ॥ ११ ॥

मुक्ताहारेति ॥ आहारात्यागपूर्वकमनुवर्तिता अपि तद्वृत्यै तदासिकायै अन्तरमवकाशं कालं न दिशन्ति सर्वमपि कालं यथा व्याकुला भवन्ति तथा कुर्वन्तीत्यर्थः । रज्वादिभिः बन्धने कृतेऽपि मुष्टिदण्डकशादिभिः मर्दने कृतेऽपि अन्योन्य-

उष्णश्शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णतां
कामान्तःपुरचेटिकाकुचतटीकाठिन्यवन्तः खलाः ॥ १२

(अन्यत्र) कञ्चुकबन्धने करविमर्दने चान्योन्यसम्पीडनं परस्परोपद्रवकरणं न जहति न त्यजन्त । उष्णे स्वापेक्षया अधिकबले ग्रीष्मकाले च शीतलतां सौम्यतां शैत्यं चोपेत्य शिशिरे सौम्ये शीतकाले च उष्णतां क्रूरहृदयत्वमुष्णत्वं च व्रजन्ति ॥ "कूपोदकं वटच्छाया नारीपीनपयोधरौ । शीतकाले भवेदुष्णमुष्णकाले च शीतलं" इत्युक्तेः । अत्र कुचतटकाठिन्यवन्त इति निदर्शनतयान्यधर्मस्यान्यत्रासम्भवादौपम्यमाक्षिप्यते । सर्वैर्वाक्यैः श्लेषमूलकाभेदातिशयोक्तिगर्भैर्निदर्शनागर्भैश्च कुचौपम्यं ध्वन्यते ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य पदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीमद्वेङ्कटाचार्यसोमसुत्सुतस्य श्रीश्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकाख्यायां
खलपद्धतिः तृतीया ॥

सम्पीडनं न जहति । खलः खलान्तरं बाधते तेन बाध्यते चेत्यर्थः । उष्णे क्रूरे पुरुषे शीतलतां मृदुतामनुनयमुपेत्य शिशिरे प्रियवादिनि जने प्राप्ते उष्णतां क्रूरतां भजन्ति । कामान्तःपुरचेटिकाकुचतटीनां यत्काठिन्यं तद्वन्तो भवन्ति । न हि मन्दसौन्दर्याः तरुण्यः कामान्तःपुरचेटिकाभावमर्हन्ति इति तत्कुचतटीकाठिन्यमतिप्रकृष्टमिति खलकाठिन्ये तत्सादृश्योक्तिः । यथा तत्कुचतटी मृदुत्वलेशमपि न सहते तथा खला अपि दयालेशं न सहन्ते इति सादृश्योक्तिः । त्रिष्वपि पादेषु कुचधर्मोऽपि प्रतीयते । मुक्ताहारेण मौक्तिकमालया निषेविता अपि कुचतटी हारस्थित्यर्थमपि अन्तरालदेशं न दिशति । बन्धे निगलबन्धेऽपि करविमर्दनेऽपि अन्योन्यसङ्घर्षं न त्यजति । उष्णे घर्मकाले शीतस्पर्शं प्राप्य शिशिरकाले उष्णस्पर्शं भजतीति एवमपि सादृश्यमस्तीत्यर्थः ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायां दुर्जनपद्धतिस्तृतीया ॥

दुर्वृत्तपद्धतिः ।

गुणजालप्रकर्षेऽपि धीवरत्वेऽपि जन्मतः ।
सर्वतीर्थावगाहेऽपि नीचवृत्तिर्न शस्यते ॥ १ ॥

"आचारहीनं न पुनन्ति वेदाः छन्दांस्येनं विजहत्यन्तकाले । नीतं शकुन्ता इव जातपक्षाः न दिव्यया केवलया तपसा वापि पालता ॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते । सर्वागमानामाचारः प्रथमं परिकल्प्यते ॥ कुलमाचारकर्मणा" इत्यादिभिर्वृत्तस्यावश्यकत्वमभिधेयमाह—**गुणेति** ॥ गुणजालानां गुणसमूहानां प्रकर्षेऽपि गुणयुक्तानायानामाधिक्येऽपि "जालं समूह आनाय" इत्यमरः । जन्मतः जन्मप्रभृतीत्यर्थः । धीवरत्वेऽपि बुध्या श्रेष्ठत्वेऽपि जन्मतः जात्या कैवर्तत्वेऽपि "कैवर्तो दाशधीवरावित्यमरः । सर्वतीर्थेषु सर्वपुण्योदकेषु अवगाहेऽपि जलावतार-स्थानेषु "निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ" इत्यमरः । नीचवृत्तिः निकृष्टाचारः निम्नदेशस्थितिश्च, कैवर्तानां मत्स्यग्रहणाय निम्नदेशस्थितत्वात् । न शस्यते न स्तूयते । अतिशयावहं न भवतीत्यर्थः । अत्र कैवर्तसाम्यध्वनिः... ॥ १ ॥

गुणेति ॥ नीचवृत्तिः निन्दितकर्मा पुरुष, गुणजालप्रकर्षेऽपि दयाक्षान्त्या-दिगुणसमूहात्मप्रकर्षे सत्यपि जन्मत आरभ्येति शेषः । धीवरत्वेऽपि धिया बुद्ध्या श्रेष्ठत्वेऽपि सर्वतीर्थावगाहेऽपि पुष्करादिपुण्यतीर्थेषु स्नानेऽपि न शस्यते सत्पुरुषैः न स्तूयते । गुणवतो बुद्धिश्रेष्ठस्य कथं निन्दितकर्मत्वमिति चेत् धर्मपुत्रादिषु राजसेवादेः...वचनादेरिव च उपाधिवशेन क्वचित्तन्मात्रविवक्षितत्वात् । यद्वा यस्मिन्नि-न्दितकर्मणि पुरुषः प्रवर्तते तदविरोधिगुणत्वं गुणजालप्रकर्षेऽपीति विवक्षितम् । विष-यान्तरे च बुद्धिश्रेष्ठता विवक्षितेति नासम्भवः । यद्वा नीचवृत्तिरित्यनेन नीचेषु वृत्तिः स्थितिः यस्य स इति विवक्षितम् । विभीषणादौ च दृष्टमेतत् । तस्याः प्रशं-सा कुतः न इति चेत् हितोपदेशकाले सर्वधनापहारपूर्वकं निरस्तत्वेनानर्थोदर्कत्वेन सत्पुरुषासम्मतत्वात् । अर्थान्तरं प्रतीयते । गुणस्य रज्वादेर्जालस्य आनायस्य "आनायः पुंसि जाल स्यात्" इत्यमरः । जन्मतः न क्रियामात्रेण धीवरत्वेऽपि कैवर्तत्वेऽपि "कैवर्तो दाशधीवरौ" इत्यमरः । सर्वतीर्थावगाहेऽपि नीचवृत्तिर्निन्दि-तकर्मा न शस्यते अपकृष्टजनसहवासी वा न शस्यते सत्पुरुषैः नाभिवन्द्यते । गुण-

द्विजराजाङ्कसंस्थोपि सन्मार्गाचारवानपि ।
विशुद्धिरहितः कश्चित् न विन्दत्यकलङ्कताम् ॥ २ ॥

द्विजेति ॥ द्विजराजाङ्के ब्राह्मणश्रेष्ठसमीपे संस्था स्थितिर्यस्य स तथोक्तः "अङ्कं स्थानांतिकामर्षकंपनोत्संगलक्ष्मसु" इति विश्वः । "संस्थाचारस्थितौ मृतौ" इत्यमरः । यद्वा द्विजराजाङ्के संतिष्ठत इति संस्थः सुपिस्थ इति कः । सन्मार्गाचार-

---

तः कर्मान्तरेण च उत्कृष्टस्यापि जातिदुष्टस्यापि निन्दितकर्मप्रवृत्तिर्दुर्जनसहवासश्च न शस्यत इत्यर्थः ॥ १ ॥

द्विजेति ॥ द्विजराजाङ्कसंस्थोऽपि द्विजानां ब्राह्मणानां राज्ञां भूभृताम् अङ्के संस्थितोऽपि । "अङ्कस्समीप उत्सङ्ग'इति विश्वः । सन्मार्गाकारवानपि मार्गश्चाकारश्च मार्गाकारौ अस्य स्त इति सन्मार्गाकारवान् प्रशस्ताचारवेषवानपीत्यर्थः । कश्चित् अविज्ञातः पुरुषः विशुद्धिरहितश्चेत् पितृमात्रादिशोधनं न कृतं चेत् अकलङ्कतां न विन्दति सत्कर्मसम्बन्धे विद्यासम्बन्धे योनिसम्बन्धे निस्संशयप्रवृत्तिविषयत्व न भजति । "दूरादेव परीक्षेत ब्राह्मणं वेदपारगमिति" सत्कर्मसु परीक्षाविधानात् "तस्मिन्नभिजनविद्यासमुदितं समाहितं संस्कर्तोपसीदेत् । इति जन्मवंशपरीक्षायाश्च पूर्ववृत्तपरीक्षायाश्च विधानात् । अभिजनशब्देन जन्मवंशपरीक्षोच्यते । विद्याशब्देन विद्यावंशपरीक्षा । समाहितशब्देन प्राचीनकर्मवृत्तपरीक्षा विवक्षिता । अविप्रतिप.....धर्मेभ्य इत्यनेन गुरुवरणानन्तरमपि धर्मविप्रतिपत्तौ त्यागो विवक्षितः । सर्वमिदं विद्यासम्बन्धमात्रे । धर्मसम्बन्धमात्रे तु ब्राह्मणानामार्त्विज्यमिति ब्राह्मणधर्माः सर्वेऽपिब्राह्मणजन्म च ब्राह्मणत्वप्रयोजकं ब्रह्मजन्म च परीक्ष्यत्वेन विवक्षितं । ब्राह्मणानार्षेयानृत्विजो वृणीते इत्यार्षेयत्वपरीक्षा च विहिता । आर्षेयस्वरूपं ब्राह्मणे दर्शितमेष वै ब्राह्मणऋषिरार्षेयो यश्शुश्रुवानिति जन्मतः कर्मतश्चापर्युदस्तः यस्तादृशाचार्यात् धर्मेण लब्धवेदाध्ययनतदर्थावबोध इत्यर्थः । योनिसम्बन्धेऽपि "दशपुरुषविख्यातात् श्रोत्रियाणां महाकुलात् । स्फीतादपि न सञ्जायेत रोगदोषसमन्वितात् । एतैरेव गुणैः युक्तः सवर्णः श्रोत्रियो वरः । महत्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् । हीनक्रिय निष्पुरुष निश्छन्दो रोमशाट् स.....क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च' । इत्यादिभिः

---

१ कार

वानाप स्पष्टम्। अन्यत्र चन्द्रोत्सङ्गवत्यपि सन्मार्गे नक्षत्रमार्गे आ समन्ताच्चारवान् संचारवानित्यर्थ । विशुद्धिरहितः परिशुद्धिरहितः न विद्यते कलङ्कोऽपवादो यस्य तस्य

परीक्षा विहिता । दुर्गुणाभावपरीक्षा तु यत्नतः कर्तव्येत्युक्तम् मनुना । "काममामरणात्तिष्ठेत् पितुर्वेश्मनि कन्यका । गुणहीनाय दातव्या न कदाप्यविपाश्चिते । न ब्राह्मण परीक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः"। इत्येतत्तु दैवकर्माण न परीक्षानिषेधार्थम् । किन्तु पितृकर्मणि अयोग्यसम्बन्धे दोषाधिक्यपर । यद्यपि दैवे न परीक्षेत तथा पित्र्ये परीक्ष्येतेत्यर्थः । "दूरादेव परीक्षेत ब्राह्मण वेदपारगम्। तीर्थे तद्वव्यकव्यानां प्रदाने सोऽतिथिस्स्मृत"इति हव्यकर्मण्यपि परीक्षाविधानात् "संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनान्नतयान्सशनात्... इत्ययोग्यसम्बन्धे पातित्योपदेशाच्च। अथवाऽतिथिरपि परीक्षणीय एव सोऽतिथिस्मृत इति परीक्षितस्यातिथित्वस्मरणात्। "उत्तमेषूत्तमं कुर्यान्नीचे नीचं समे समं" इति उत्कर्षतारतम्येन पूजातारतम्यविधानाच्च । न ह्यपरीक्षिते तारतम्यज्ञानं सम्भवति । "न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके पापे नावेदविदि धर्मवित्" इति निन्दितेष्वातिथ्यानर्हाच्च आचण्डालेभ्यः इत्यपि जातिदूषितोऽपि दानार्ह इत्युच्यते । कर्मदूषितस्य नानुमन्यते "न पृच्छेत् गोत्रचरणान् न स्वाध्यायं न च श्रुतम्" । इत्येतदपि गोत्रादिप्रश्ननिषेधपरं विषयान्तरप्रश्नेन वेषभाषादिभिश्च स्वभावपरीक्षायां न बाधकम् । यद्वा विशुद्धरहितः कृतपापप्रायश्चित्तरहितः अकलङ्कतां निष्पापतां न विन्दति । अस्मिन् पक्षे द्विजराजाङ्कसंस्थोऽपीत्यत्र राजशब्दः श्रेष्ठपरः भूपतिसमीपस्थितेः पापनिवर्तकत्वात् । यद्वा विना परमात्मना शुद्धिः "विःपक्षिपरमात्मनोः" इति भट्टबाणः, "क्षेत्रज्ञस्येश्वरज्ञानात् विशुद्धिः परमा मता" इति याज्ञवल्क्यः। कश्चित् क्षेत्रज्ञः अकलङ्कतां न विन्दति, कलङ्कः प्रकृतिसम्बन्धः । यद्वा विगता शुद्धिः यस्य सः अहितः प्रतिकूलः अकलङ्कतां निष्पापतां न विन्दति । अथान्तरम् द्विजराजाङ्कसंस्थोऽपि चन्द्रोत्सङ्गगतोऽपि सन्मार्गाकारवानपि । मृगशब्दात् तस्येदमित्यण्प्रत्यये कृते तद्धितेष्वचामादेरिति वृद्धौ मार्ग इति सिद्ध्यति । "मार्गश्चासावाकारश्चेति समासः । हरिणाकारवानपीत्यर्थः । विशुद्धिरहितः मालिन्याभावरहितः कश्चित् अकलङ्कतां कलङ्कभिन्नतां न विन्दति । यद्वा द्विजराजः पक्षिराजः स एवाङ्कः ध्वजः चिह्नं तदुपरि स्थितोऽपि सतां नक्षत्राणां मार्गः आकाशं तद्वत् नीलरूपाकारवानपि विगता शुद्धिः

भावस्तत्ता तामन्यत्र चिह्नरूपत्वं "कलङ्कोऽङ्कापवादयोः इत्यमरः। न विन्दति न प्राप्नोति। सापवादत्वमेव प्राप्नोतीत्यर्थः ॥ २ ॥

येषां ते विशुद्धयः ते रहिता येन स विशुद्धिरहितः अपरिशुद्धान् वर्जयन्नित्यर्थः। अयं चार्थो विवक्षितः वेः पक्षिणः काकादिकस्य शुद्धिः स्नानादिकमिव येषां ते विशुद्धयः काकादयो हि स्नानं कृत्वा पुनर्जुगुप्सितमश्नन्ति तद्वत् निन्दिताभ्यसने पूर्वकृतं प्रायश्चित्तादिकं व्यर्थीकुर्वन्त इत्यर्थः। ते रहिता येन स इति पूर्ववद्विग्रहः। शोधितपापा अपि ये पुनःपापेषु प्रवर्तन्ते नानापि वर्जयन्ति... कं ब्रह्मणं करोति तत्कयति। तत्करोति तदाचष्ट इति णिच् णिजन्तादेराजिति अच्प्रत्यये कृते क इति रूपं सिध्यति। ब्रह्मणस्स्रष्टुरित्यर्थः। एतदर्थाभिप्रायेण नामसहस्रे पठ्यते। "एको नैकः सवः कः किमिति" चित् ज्ञानात्मा। "प्रेक्षोपलब्धिश्चित् सवित्" इत्यमरः। अकलङ्कतां चिह्नराहित्यं न विन्दति श्रीवत्सलाञ्छनत्वात्। यद्वा द्विजराजाङ्कसस्थोऽपि चन्द्रसमीपस्थितोऽपि सन्मार्गाकारवानपि सन्मार्गे आकाशे आकृतिमानपि सतां सुक्तानां मार्गभूताकारवानपि विशुद्धिः विशिष्टशुद्धिः चित् "चितीं संज्ञान" इति धातोः अन्तर्भावितण्यर्थात् क्विपि रूपम्। चिदिति चेतयन् ज्ञानोत्पादक इत्यर्थः। कस्सूर्यः अकलङ्कतां निरपवादताम् अहितः सैंहिकेयात् अहिस्सर्पः पञ्चम्यर्थे तसि; न विन्दति राहुणा परिभूयते इत्यपवादयुक्तो भवतीत्यर्थः। अर्थान्तरम्। जराजानां जराजनितानाम् अङ्कानां संस्था अवस्थानं जराजाङ्कसंस्था द्वे जराजाङ्कसंस्थे यस्य सः द्विजराजाङ्कसंस्थः जराचिह्नानि द्विविधानि। वलीपलितादीनि दृश्यानि बलक्षयादीन्यदृश्यानि। मार्गाकारवानपि मृगसम्बन्धाकारवानपि मृगो यथा शौचसम्पादनासमर्थतया अपरिशुद्धाकृतिः तद्वदपरिशुद्धाकारोऽपि सन् क्षीणपापः पुरुषः "साधवः क्षीणपापास्तु सच्छब्दस्साधुवाचक" इति विष्णुपुराणे। विशुद्धिभिः विगतशुद्धिभिः दुर्जनैरहितः को वा चित् चेतनः अकलङ्कतां निरपवादतां न विन्दति। अर्थान्तरम्। द्विजराजाङ्कसंस्थोऽपि स्वचिह्नभूत पक्षिराजे हंसे स्थितोऽपि कः ब्रह्मा रजस्तमोविरहरूपया विशुद्धया रहितः अकलङ्कतां न विन्दति वेदापहारादिना असुरैः परिभूयत इति सापवादतां भजते। तथा सन्मार्गाकारवानपि अष्टमूर्त्यन्तर्गततया आकाशशरीरः चित्सर्वज्ञोऽपि विशुद्धिरहिततया अकलङ्कतां न विन्दति गुरुपातकदैत्यपीडापवादवत्तां भजते ॥ २ ॥

अवक्रस्तारकाधीशः परिपूर्णप्रियोदयः ।
प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते ॥ ३ ॥
पततां हन्त केषांचित् लभते मलिनात्मनाम् ।
विशुद्धवर्णयोगोऽपि विपरीतनिमित्तताम् ॥ ४ ॥

सरलहृदयोऽपि तारकमन्त्रोपासकोऽपि परिपूर्णप्रियभाग्योऽपि शुभाचारं परित्यज्य नरकपतनमेव भजति । "गोभिः पशुभिरश्वैश्च कृष्या च सुसमृद्धया । कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः ॥ वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च । अक्षीणो वृत्ततः क्षीणो वृत्ततस्तु हतो हत" इत्युक्तेरित्याह—**अवक्रेति** ॥ प्राचीं दिशं शुभाचारं पूर्वककुभं च शेषं स्पष्टम् ॥ ३ ॥

दुराचाराणां श्रेष्ठब्राह्मण्यादिजातियोगोऽपि प्रत्यवायभूयस्त्वायेत्याह—**पतेति** ॥ मलिनात्मनां दुराचाराणाम् अत एव पततां द्विजातिकर्मभ्यो हानिः पतनं, तद्वतां विशुद्धवर्णयोगो ब्राह्मणजातियोगो विपरीतनिमित्ततामत्यन्तनिकृष्टताहेतुतां भजते । यथा मलिनात्मनां श्यामवर्णानां पततां वृक्षेभ्यः स्रवतां केषांचित् पत्राणामित्यर्थः । विशुद्धवर्णयोगः पाण्डुत्वयोगः विपरीतनिमित्ततां पाण्डुपत्रावरुद्धकिसलयादिनिमित्तताम् भजते । पत्रसमाधिः । यद्वा पततां स्कन्धफालादिदेशे पतनवतां मलिनात्मनां शिरोरुहाणां विशुद्धवर्णयोगः जराशौक्ल्यं विपरीतनिमित्ततां वृद्धताज्ञापनद्वारा मरणज्ञापकतां भजत इति शिरोरुहसमाधिर्वा बोद्धव्यः ॥ ४ ॥

अवक्रेति ॥ अवक्रः ऋजुबुद्धिः तारकाणामुत्तारकाणां परापत्निवारकाणाम् अधीशः प्रभुः परिपूर्णः सद्गुणपूर्णः प्रियोदयः सन्तोषविषयाभिवृद्धिकः प्राचीं दिशं प्राचां सम्बन्धिनीं दिशं गतिं चरितमतिक्रम्य उल्लङ्घ्य पतनं कर्मानर्हतां प्रतिपद्यते । अर्थान्तरम् । अवक्रः वक्रतारहितमण्डलः तारकाधीशः नक्षत्रपतिः परिपूर्णः परितः पूर्णः प्रियोदयः इष्टोद्गमः प्राचीं दिशं ककुभमतिक्रम्य पतनम् उन्नतप्रदेशात् भ्रंशं प्रतिपद्यते । "आशोपायगमेषु दिवा" इति । भट्टबाणः ॥ ३ ॥

पतेति ॥ तामसस्वभावानां पततां पतनीयं कर्म कुर्वतां केषांचित्पुरुषाणां विशुद्धवर्णयोगोऽपि शुद्धिविशिष्टब्राह्मणादिवर्णसम्बन्धोऽपि विपरीतनिमित्ततां अश्रेयःकारणतां भजते । अर्थान्तरं तु मलिनात्मनां कृष्णशरीराणां केषांचित्

---

२ पूर्णः प्रियो

पतनानन्तरं कृच्छ्रात् प्ररूढः शुद्धिमानपि ।
द्विजस्सञ्छाद्यते कश्चित् अधरेणापि रागिणा ॥ ५ ॥
जोषमेकपदे स्थित्वा सन्निकृष्टान् क्षणाद्धसन् ।
बहिर्दर्शितसंशुद्धिः बकोऽप्याहार्यमर्हति ॥ ६ ॥

दुराचारोऽपि प्रायश्चित्तेन शुद्धश्चेत् केनाप्यनुगृह्यत इत्याह—**पतनेति** ॥ द्विजातिकर्मभ्यो हानिः पतनं तदनन्तरं कृच्छ्रात् कृच्छ्रादिप्रायश्चित्तात् प्ररूढः पुनर्द्विजत्वापादकसंस्कारोत्पन्नः अत एव शुद्धिमान् द्विजोऽपि कश्चित् रागिणा प्रीतिमता अधरेणापि शास्त्राभिज्ञेन अनुगृह्यत एव तदनभिज्ञेन पामरेणापीत्यपि-शब्दार्थः। सञ्छाद्यते पततोऽयमिति न प्रकाश्यत इत्यर्थः। "गुणदोषौ बुधो गृह्णन्निन्दु-स्त्वेलाविवेश्वरः। शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥ इति दोषोद्घाटनस्यानु-चितत्वात् सहृदयस्येति भावः। दन्तसमाधिरत्र गम्यत। द्विजो दन्तः "दन्तवि-प्राण्डजा द्विजाः" इत्यमरः। कृच्छ्रात् अतिप्रयासात् प्ररूढः उत्पन्नः अधरेणाधरो-ष्ठेन। शेषं सुगमम् ॥ ५ ॥

कश्चिदुदरपोषणार्थं परिशुद्ध इवाभिनयन् डाम्बिको भवति। तादृशैः "हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेदिति सम्भाषणादिकमपि न कुर्यादित्यभिप्रेत्याह— **जोषमिति** ॥ बहिर्दर्शितसंशुद्धिस्स्नानादिना वैशिष्ट्यमभिनयन्नित्यर्थः एकपदे

पततां पक्षिणां काकानां विशुद्धवर्णयोगोऽपि शुक्लसम्बन्धवर्णोऽपि विपरीतनिमित्त-तां अश्रेयस्सूचकतां भजते "पुच्छनक्षत्रमण्डूक श्वेतपक्षं च वायसम्। रात्रा-विन्द्रधनुर्दृष्ट्वा तद्राष्ट्रं परिवर्जयेत्" इति संहितावचनात् ॥ ४ ॥

पतेति ॥ द्विजः त्रैवर्णिकः पतनानन्तर प्रतिषिद्धाचरणानन्तरं कृच्छ्रात् प्राजापत्यादिकात् शुद्धिमान् प्ररूढोऽपि प्रासिद्धोऽपि रागिणा दुर्विषयप्रसक्तानुरागे-णाधरेणापि निकृष्टेनापि सञ्छाद्यते अप्रकाशः क्रियते। अर्थान्तर। द्विजः दन्त. पतनानन्तरं कृच्छ्रात् क्लेशात् विलम्बेन प्ररूढोऽपि जातोऽपि शुद्धिमानपि काष्ठा-दिभिः कृतशोधनोऽपि रागिणा रक्तवर्णेन अधरेणापि दन्तवाससापि सञ्छाद्यते आपिधीयते ॥ ५ ॥

जोषमिति ॥ अमत् दुर्जनः एकपदे एकस्यैव पदं जनान्तररहितम् एकपदं तस्मिन् रहसि जोषं तूष्णीं निश्शब्दमित्यर्थः "तूष्णीमर्थे सुखे जोष"इति भट्टबाणः।

---

१ त्वास २ बकव्या

एकचरणे जोषं मौनेनान्वितः स्थित्वा योगं कुर्वाण इव मौनमाश्रित्य एकपदे-स्थित्वेत्यर्थः। सन्निकृष्टान् यैः कैश्चिदयं महायोगीति भक्त्या समर्पितान् उपहारान् भक्षणादिकानविलम्बेन घसन् गृह्णन् बकोऽपि बकब्राह्मणोऽपि आहारमर्हति आहारं लब्धुं योग्यो भवतीत्यर्थः । तादृशनिकृष्टवृत्त्यापि स्वोदरपूरणमेव न परसंरक्षण-

स्थित्वा निकृष्टान् दुर्बलान् क्षणात् झटिति घसन् हिंसन् निन्दितपदार्थान् भक्षयन्निति चार्थः । एवमन्तःपापबाहुल्येऽपि बहिर्दर्शितसंशुद्धिः जनसमक्षं दर्शितदुरितभावः पुरुषः बकव्याहारमर्हति बक इति व्याहारमुक्तिमर्हति ॥ "व्याहार उक्तिर्लपितं"इत्यमरः । "पाषण्डिनोऽपि कर्मस्थान् बैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् । न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके पापे नावेदविदि धर्मवित् इत्यादिषु बकवृत्तिशब्देन निर्देशात् बकस्वरूपं दर्शितं मनुना " अधोदृष्टिः नैकृतिकः स्वार्थसाधनतत्पर । शठो मिथ्याविनीतश्च बकवृत्तिचरो द्विज' इति । बको यथा मत्स्यदर्शनाय अधोदृष्टिः भवति तद्वत् दुर्जनोऽपि अधोदृष्टिर्भवति । बाध्यदर्शनार्थम् अधश्शब्देन दुर्बलो लक्ष्यते। निकृतिः निन्दितकर्म "कुत्सितिर्निकृतिश्शाठ्यम् इत्यमरः । निकृत्या जयतीति नैकृतिकः । बको यथा विश्वासोत्पादनेन मत्स्यान् बाधते तथैव दुर्जनोऽपीति भावः । बको यथा धर्ममनादृत्य स्वार्थसाधनतत्परः तद्वदयमपि बकवत् शठः दृढविप्रियकृत् चिकीर्षितविप्रयोगोपनमनेनोच्यते नैकृतिकपदेन तु विश्वासोत्पादनामिति भेदः । "स्यान्नैकृतिको नैकृतिकः शठः कार्पटिकोऽनृजुः इति पर्यायत्वेऽपि न दोषः । अत्र तदर्थाविवक्षणात् ।"मिथ्याविनीतः असत्यप्रशमलिनयशिक्षाविचारः प्रशान्तिष्विति भट्टबाणः । विनीतशब्दो भावार्थकः ।'प्रशमस्यापत्यत्वं बाध्यलाभे सति परित्यागः । एवं गुणक्रियासाम्यात् बकव्यवहारार्हता । अर्थान्तरम । एकपदे एकस्मिन्नेव स्थाने जोषं निर्व्यापारम् अचेतनवत् स्थित्वा अचेतनबुद्धयुत्पादनेन सन्निकृष्टान् संविधगतान् क्षणादविलम्बेन घसन् भक्षयन् अन्तर्मलमूत्ररक्तमांसादिषु कृष्णरक्तादिवर्णान्तरत्वेऽपि बहिः बाह्यावयवेषु दर्शितसंशुद्धिः वर्णान्तरविषयं दर्शयन् । यद्वा अन्तर्जिघांसासत्वेऽपि बहिर्दर्शितहिंसाविरहः बक इति व्याहारमर्हति । अर्थान्तरं। सन्निकृष्टान् दुर्बलमीनान् घसन् प्रबलमीनः बहिर्दर्शितसंशुद्धिः दर्शितावदातभागः बकस्य वेः पक्षिणः आहारं भक्षणक्रियामर्हति । अर्थान्तरम् । सन्निकृष्टान् सतः प्रशस्तान् दधिक्षीरादीन् निकृष्टानप्रशस्तान् पुरुषपशुमयमांसादीन् घसन् बहिर्दर्शित-

द्विजस्य सितपक्षस्य कवेरपि निरस्यते ।
न हंस इति साजात्यं गतिशब्दितवृत्तिभिः ॥ ७ ॥

मित्यभिप्रायेणाहारमर्हति इत्युक्तम् । "यस्मिन् जीवति जीवन्ति बहवस्स तु जीवति। बकोऽपि किन्न कुरुते चञ्चवा स्वोदरपूरणम्" ॥ इत्यपिशब्देन ज्ञापितम् अत्र बक समाधिः । सन्निकृष्टान् मत्स्यानेकपदे युगपत् अव्ययमेतत् । घसन् भक्षयन् ॥ ६ ॥

द्विजस्य परिशुद्धसहायस्य पण्डितस्यापि समीचीनव्यवहारः समीचीनदाक् समीचीनजीवनं च विद्यते चेत् शिष्टैस्सह शिष्टत्वेन संव्यवहारो भवेत् । नो चेत् बहिष्कार्यतैवेत्यभिप्रायेणाह — **द्विजेति** ॥ मातृगर्भादण्डरूपेण जनन पुनरण्डात् चरणादिविशिष्टरूपेण जननमिति द्विजस्य सितपक्षस्य श्वेतगरुतः के उदके सञ्चरन् विःपक्षी कविः तस्यापि गतिशब्दितवृत्तिभिः हस इति साजात्यं न निरस्यते । हंसस्य हंसान्तरेण साजात्यं गतिशब्दितवृत्तिभिः एकस्य हंसस्य यादृशी गतिः

संशुद्धिरिति निश्शेषीकरणमस्थिचर्मादेरनुपादेयस्य अपनयनं चोच्यते । एवंभूतः कश्चित् असुरो बकशब्देन व्यवहारमर्हति । अर्थान्तरं बहिर्दर्शितसंशुद्धिः बाह्यावयवेष्वन्तश्च गुरूपदिष्टस्शुद्धिः पश्चा.....भोजनं कर्यात् । अस्नाताशीमलं भुङ्क्ते भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचमेत् इत्याद्युपदिष्टशुद्धिं कृत्वा एकपदे स्थित्वा एकस्मिन्नेवावस्थाने निवृत्तगतिको भूत्वा 'ष्ठा गतिनिवृत्ताविति धातुः । भोजनकाले गमनप्रतिषेधात् देशैकत्वनियमाच्च । असन्निकृष्टान् सन्निकृष्टानिति च द्वधा पदच्छेदः। सद्भिर्निन्दताः सन्निकृष्टाः । अनादृशा असन्निकृष्टाः । सन्निकृष्टा यदृच्छयोपनताः "न सन्निपतित धर्म्यम् उपभोग यदृच्छया" इत्युक्तलक्षणान् पदार्थान् क्षणात् झटिति सन्तोषादिति चार्थः । अत्यन्तोषविलम्बयोर्निषेधात् । घसन् अदन् 'घसु अदन" इति धात्वन्तर । पुनरपि भोजनस्थानात् बहिः दूरादेव दर्शितसशुद्धिः हस्तपाद-मुखशुद्धिं कृत्वा "स्नात्वा भुक्त्वा क्षुतं सुप्ते" इति स्मृत्या द्विराचम्य पश्चादेव भीमसेनः बकासुरेण सह व्याहारमर्हतीत्यप्रस्तुतार्थप्रतीतिः ॥ ६ ॥

द्विजेति ॥ द्विजस्याण्डरूपेण पक्षिरूपेण च द्वेधा जन्मभाजः सितपक्षस्य शुक्लगरुतः कवेः जलपक्षिणः द्विजस्य मातृस्सावित्र्याश्च द्विजातस्य सितपक्षस्य भिन्नपरिग्रहस्य षोन्तर्कर्मणीतिधातुः। सर्वत्र ममतां त्यक्तवतः इत्यर्थः । कवेर्विदुषः।

अव्यवस्थितवृत्तानामभिन्नश्रुतिचक्षुषाम् ।
अधर्मार्जितभोगानामाशीरप्यहितोचिता ॥ ८ ॥

यादृशशब्दो यादृशी जीविका तादृशमन्यस्याप्यस्ति चेत् हस इत्युच्यते । न द्विजत्व-पितपक्षत्वकवित्वैः द्विजस्य सितपक्षस्य कवेः बकस्य तादृशगतिशब्दितवृत्त्यभा-वेन हंसत्वाभावादिति भावः ॥ अप्रस्तुतप्रशंसालङ्कारः ॥ ७ ॥

विरुद्धाचारणामाशीरपि न श्रेयस्साधनमिति आह—**अव्येति** ॥ "अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणास्संमर्शिनः युक्ता आयुक्ताः अलूक्षाधर्मकामास्युः यथाते तत्र वर्तेरन् तथा तत्र वर्तेथा" इत्युपदेश. मार्गं विहायाव्यवस्थितचरित्राणामभिन्नः जीवात्मना एकीभूतः श्रुतिचक्षुः परमात्मा येषां ते तथोक्ताः तेषां देवचक्षुस्सनातन इत्युक्तं श्रुतिचक्षुरशब्दस्य परमात्म-परत्वम् । यद्वा अभिन्नमविचारितं श्रुतिचक्षुः चक्षुस्सदृशश्रुतिः यैस्ते तथोक्तास्ते-षाम् "श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते । इत्युक्तेः श्रुतेः चक्षुस्सदृशत्वम्

"संख्यावान् पण्डितः कोविरित्यमरः । न हंस इति वाक्यजन्यप्रतीतिविषयत्वकृतं साजात्यं गतिशब्दितवृत्तिभिः निरस्यते न हंस इति वाक्यस्य हंसान्यान्यत्वेन हंसप्रतिपादकताया केवलजीवत्वाभावेन भगवदात्मकत्वेन च भगवत्प्रतिपादकता इदं साम्यं गमनेन कूजितेन अभ्यवहारेण च हंसस्य गतिराकाशे शब्दितं च नार्थ-प्रतिपादकं वृत्तिश्च बिसादिभक्षणरूपा कवेस्तु गतिः भूमौ च शब्दितं चार्थबोधकं वृत्तिश्च यज्ञशिष्टाशनरूपा । गतिरवगतिः वृत्तिर्व्यापारः । पक्षिणोऽवगतिः दृष्टमात्र-विषया कवेस्तु तत्वहितपुरुषार्थविषयी शब्दित च हंसस्य नादात्मकं निष्फलं कवेस्तु वेदाभ्यासादि रूपं निश्रेयससाधनं वृत्तिः पक्षिणोचित ..विदुषस्तु देवता...अनादिरूपः व्यापारः श्रेयस्साधनमिति भेदः यत्किञ्चित्धर्मकृतं विद्वत्साम्य तिर्यक्साधारणं विद्याकृतं तु तदितरस्य.....दिति भावः ॥ ७ ॥

अव्येति ॥ वृत्तमात्मगुण· दुर्जनस्य किञ्चित् कदाचित् यदा क्षान्त्यादिलेशो दृश्यते न सर्वविषया सर्वकालव्यापि चेत्यव्यवस्थितवृत्तत्व धर्माप्रवर्तकतया पाप-प्रवर्तकतया च श्रुतिचक्षुषोस्तुल्यत्वमेव न कश्चिद्विशेष इत्यभिन्नश्रुतिचाक्षुष्ट्व एतेनैवो-पपादकमुत्तरविशेषम् अधर्मार्जितभोगत्वं एवंभूतानामाशासनमप्यहितोचितं शत्रु-योग्यं बाधकविषयमेवेत्यर्थः । अर्थान्तरम् । अव्यवस्थितानाम् । "अवयश्शैलमेषा-

दुष्टैरारोपितः कश्चिदनर्थक्रिययान्वितः ।
असत्कारेण गृह्येत विरुद्धाकारवेदिभिः ॥ ९॥

अधर्मेण धर्माभिन्नेन काम्यकर्मणा अनभिसंहितफलो भगवत्प्रीणनैकप्रयोजनतयानुष्ठीयमानश्शास्त्रविहितो धर्मः ताद्धत्र अधर्म एव "धर्मेण पापमपनुदतीत्यत्राभिसंहितधर्मस्यापि पापत्वाभिधानात् आर्जितः भोगः स्वर्गानुभवो येषां ते तथोक्ताः तेषामाशीरपि अहितोचिता हितोचिता न भवति श्रेयस्साधनाय न समर्थेत्यर्थः । अत्र निदर्शनम् अविषु पर्वतेष्ववस्थिता वृत्ता वर्तुलाश्च तेषामभिन्नश्रुतिचक्षुषां सर्पाणां चक्षुश्रवस्त्वात् अधर्माय परहिंसायै आर्जितः भोगः शरीरं येषां तेषां सर्पाणामित्यर्थः। "अहेश्शरीरम्भोगस्स्यादिति निघण्टुः । आशीर्दंष्ट्रापि अहितायास्सर्पत्वस्योचिता योज्या । "आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः"इति विश्वः ॥ ८ ॥

असद्वृत्तेरारोपमात्रेणापि मान्यो न भवतीत्याह — **दुष्टैरिति** ॥ दुष्टैः दुर्जनैः अनर्थक्रियया अनर्थहेतुव्यापारेणान्वितस्सन्नारोपितः कश्चिद्विरुद्धाकारवेदिभिरारोपताकारज्ञैः असत्कारेणाबहुमानेन गृह्येत । दुष्टैः दोषयुक्तैरिन्द्रियैरनर्थक्रियया कटकमकुटाद्यर्थक्रियाभावेन क्वचित्तदभावेऽपि नाज...मासहिष्यत इत्यन्वितः। कश्चिदारोपितो

र्का" इत्यमरः । वृत्तानां सर्पशरीरं वृत्ताकारं भवति न चतरश्रत्रिकोणादिरूपम् अभिन्नश्रुतिचक्षुषां कर्णलोचनयोरैक्यवताम् अधर्मार्जितभोगानां पापसम्पादितवपुषाम् आशीः दंष्ट्रा अहितोचिता सर्पजात्यनुगुणा ॥ ८ ॥

दुष्टैरिति ॥ दुष्टैः प्रतिकूलैः प्रौढपदमारोपितः समर्थस्त्वमसीति वाक्येन सामर्थ्यभ्रमं गमित इत्यर्थः । अनर्थक्रियान्वितः निष्फलव्यापारेण सहितः कश्चित् जडः विशुद्धाकारवेदिभिः अनारोपितस्वभाववेदिभिः सत्पुरुषैः असत्कारेण सत्कारो बहुमतिः तद्विरोधी असत्कारः अवमतिरित्यर्थः गृह्येत अवमत्या ज्ञायत इत्यर्थः । अर्थान्तरम् । दुष्टैः दोषवद्भिः आरोपितः शुक्त्यादौ भ्रमविषयीकृतः अनर्थक्रियया-न्वितः अर्थः रजतादिसाध्यं प्रयोजनं तत्सम्पादनसमर्थो क्रिया अर्थक्रिया प्रितृप्रीतिसम्पादकानमन्त्रितब्राह्मणपरिवेषादिकम् अतादृशी क्रिया अनर्थक्रिया तदन्वितः कश्चित् रजतादेः विशुद्धाकारवेदिभिः आकारो धर्मः तस्य विशुद्धिरनारोपितत्वम् अनारोपितशुक्तित्वादिधर्मवेदिभिः पुरुषैः असत्कारेण असतः क्रिया असत्कारः

तमस्स्वभावमलिनं वृत्त्यालोकोज्झिताश्रयम् ।
दण्ड्यं मित्रेण राज्ञा च दृष्टदोषान्वयं विदुः ॥ १० ॥

रजतादिः विरुद्धाकारवेदिभिः शुक्तिस्वरूपज्ञैः रजतभानवेलायां सत्वेन न गृहीतोऽपि शुक्तित्वग्रहणदशाया रजतादिरर्थोऽसत्कारेणासद्भावेन गृह्येतेति प्रातिभासिकरजतादिरत्र निदर्शनम् ॥ ९ ॥

वृत्त्या मलिनो राज्ञा मित्रेणापि दण्ड्यो भवतीत्याह—**तम इति** ॥ वृत्त्या हेतुना आलोकेन प्रकाशेन लोकेन च उज्झित आश्रयो यस्य तत्तथोक्तं । दृष्टः दोषायां रात्रौ अन्वयो यस्य तत् दोषापदं रात्रिवाचकमव्ययमित्यमरसिंहादिभिरुक्तमन्येतु "ततः कथाभिः समवेत्य दोषामारुह्य सैन्यैस्सह पुष्पकं ते" इति भट्टिप्रयोगादनव्ययमप्याहुः । अन्यत्र दृष्टः दोषाणामन्वयो यस्येति बोद्धव्यं । स्वभावमलिनं तमः मित्रेण सूर्येण आप्तेन च राज्ञा चन्द्रेण नृपेण च । "राजा प्रभौ नृपे चन्द्र ॥ इत्यमरः । दण्ड्यं विदुः । श्लेषानिबन्धनोऽयमप्रस्तुतप्रशंसालङ्कारः ॥ १० ॥

शुक्त्यादावसतो रजतस्य..... ..यारजतार्थिनः शुक्त्यादेर्निवृत्तिरेव तत्प्रयोजको गृह्येत भ्रान्तारोपितसाम्यभ्रमेण जडः कर्मसु न नियोज्यः किन्तु वास्तविकस्वभावं सम्यक् परीक्ष्य तदनुरोधादुपेक्ष्य इति भावः ॥ ९ ॥

तमेति ॥ तमोगुणसम्बन्धिना स्वभावेन दुर्वासनया मलिनं भ्रान्तमित्यर्थः वृत्त्या शरीरयात्रया निमित्तभूतया लोकोज्झितानां सर्वलोकपरित्यक्तानां चौर्यानृतवदनादीनामाश्रयभूतः दृष्टदोषान्वयं दृढतरप्रमाणसिद्धदोषसम्बन्धं पुरुषं मित्रेण सुहृदा राज्ञा नृपेण च दण्ड्यं विदुः दोषश्रवणमात्रेण न दण्डयेत् किन्तु दोषं सम्यग्विचार्य पश्चाद्दण्डयेदिति भावः । अर्थान्तरम् ॥ स्वभावमलिनं स्वभावत एव मलिनम् अप्रकाशं वृत्त्या स्थित्या आधेयतया आलोकोज्झितः प्रकाश परित्यक्तः आश्रयो यस्य तत् मित्रेण सूर्येण राज्ञा चन्द्रेण च दण्ड्य नाश्यं दृष्टदोषान्वयम् चाक्षुषज्ञानाविषयीभूतरात्रिसम्बन्धरात्रौ दृष्टमित्यर्थः । एवंभूतं यद्वस्तु तत्तमे विदुः ॥ १० ॥

जातिमात्रशरणा बहिष्कृताः केचिदाहृतजघन्यवृत्तयः ।
रोषणा विपरिधाविनो मुधा ह्रेपयन्ति जनमुज्झितह्रियः ॥
आलोकावधियद्वशेन सुगतिं विन्दन्ति भूतान्यासौ
दृष्टिस्नेहविशेषतो वितनुते वंशे भुजङ्गभ्रमम् ।

दुर्जनास्स्वयं दुर्वृत्तास्सन्तः सद्वृत्तानेव लज्जापयन्तीत्याह—**जातिमात्रेति** ॥ जातिमात्रं शरणं रक्षणोपायः येषां ते तथोक्ताः मात्रचा तदुचितकर्मादयो व्यवच्छिद्यन्ते । अन्यत्र जातिः छुल्ली ॥ "जतिर्जातिफले धात्र्यां छुल्लीकम्पिल्लयोरपि इति विश्वः । तन्मात्रं शरणं स्थानं येषामित्यर्थः । बहिष्कृताः सद्भिर्निरस्ताः बहिर्देश एव स्थापिताश्च । नित्यं समासेऽनुत्तरपदस्थेति षत्वम् । आश्रिता जघन्यवृत्तिः नीचवृत्तिः शेषवृत्तिश्च येषां ते तथोक्ताः । मैथुने चरमे शिश्ने जघन्यं गर्हितऽन्यवत् इति विश्वः । रोषणा क्रोधाविष्टा नन्द्यादित्वाल्लयुः । मुहुः विशेषेण कलहार्थम् नूतनजनाप्रवेशार्थं च अभिमुखं धावन्तीति विपरिधाविनः उज्झितह्रियः स्वयं गर्हितवृत्तय इति लज्जारहिताः केचिद्दुर्जनाः शुनकाश्च जनं ह्रेपयन्ति स्वदर्शनेन जनः स्वयमेव यथा लज्जायुक्तो गच्छेत्तथा कुर्वन्तीत्यर्थः । ह्रीलज्जायामित्यस्मात् णिचि "अर्तिह्रीव्याधिना पुगागमे पुगन्तलघूपदस्येति गुणे ह्रेपयन्तीति रूपम् शुनकसाम्यं प्रतीयते ॥

क्षुद्रनिषिद्धविषयाभिलाषस्सद्बुद्धिं प्रतिक्षिपतीत्याह—**आलोकेति** ॥ आलोको यावति देशे वर्तते तावत्पर्यन्तं, भूतानि, यद्वशेन यद्दृष्टिवशेन, सुगतिं

जातिमात्रेति ॥ जातिमात्रशरणाः ब्राह्मणत्वादिजातिमात्रम् अर्थप्राप्तौ शरणम् उपायो येषां ते जातिमात्रशरणाः । आहृतजघन्यवृत्तयः निन्दितव्यापारेषु प्रीतिं कुर्वन्तः अत एव सद्भिः बहिष्कृताः रोषणाः कोपनाः मुधा निष्फलमेव विपरिधाविनः विविधं परितो धावन्तः उज्झितह्रियः त्यक्तलज्जाः केचित् जनं ह्रेपयन्ति । जघन्यवृत्तय इत्यनेन जघनभवव्यापारेषु आदरं कुर्वन्त इत्युच्यते परस्यापि लज्जावहो यो व्यापारः तेनापि स्वयमलज्जमानाः अतिदूरतः परिहार्या इति भावः ॥ ११ ॥

आलोकेति ॥ यद्वशेन यस्य दृष्टेर्वशेन आयत्ततया भूतानि प्राणिनः सुगतिं शोभनां गतिम् आलोकावधि सर्वलोकक्षयरूपमहाप्रलयपर्यन्तम् । विन्दन्ति

दक्षा भोगिषु केषुचिद्विषमितां दृष्टिं निहन्तुं क्षणात्
तामप्याशु विनाशयेत्क्षणरुचिः काचित् क्षणस्फूर्जथुः॥

शोभनगमनं विन्दन्ति । लोकावधिमभिव्याप्य स्थितानि, भूतानि, यत्सतज्ञानेन सुगतिं सद्गतिं विन्दन्तीति च । असौ दृष्टिस्तत्वबुद्धिश्च "दृष्टिर्ज्ञानेऽक्षि दर्शने" इत्यमरः । स्नेहवशेन मण्डूकवसाद्यञ्जनविशेषेण रागवशेनच, वंशे वेणौ जनवर्गे भुजङ्गभ्रमं सर्पभ्रान्तिं । विटभ्रान्तिं "वंशो वेणौ कुले वर्गे" इत्यभयत्रापि विश्वः । वंशोरगभ्रमे मण्डूकवसाञ्जनं दोष इत्याहुः जनयति वितनुते । भोगिषु सर्पेषु भोगवत्सु च, विषम् इतां प्राप्तां रागभरेण विषमीकृतां च दृष्टिं नयनं ज्ञानं च स्फूर्जथुः वज्रसङ्घशब्दो यस्यास्सा क्षणरुचिः विद्युत् काचिदाशु विनाशयेत् वज्रप-

---

महापुरुषकटाक्षेण ब्रह्मप्रलयपर्यन्तं शोभना ऊर्ध्वगतिः तैस्तैरवाप्ता प्राप्यते चेति पुराणेषु प्रसिद्धोऽयमर्थः यथा सप्तर्षीणां कटाक्षेण ध्रुवेण गतिर्लब्धा । यद्वा भूतशब्दो रुद्रानुचरपरः रुद्रानुचरैः यथा रुद्रकटाक्षात् रुद्रानुचरत्वरूपा सुगतिर्लब्धा असौ दृष्टिः स्नेहविशेषतो वंश अभुजङ्गभ्रमं वितनुते इति पदच्छेदः..... अभिरक्षिते पूजिते चेत् इति वंशविशेषणम् एवंभूते वंशे भुजङ्गभ्रमाभावं दुर्वृत्तसञ्चाराभावं करोतीत्यर्थः महापुरुषकटाक्षविषये वंशे उत्पद्यन्ते न बाधन्ते चेत्यर्थः केषुचिद्भोगिषु भोगसुखानुभवः तद्वत्सु महादृष्टिर्विषमिता प्रतिकूला चेत् तेषामदृष्टिः सौम्यदृष्टिन्निहन्तुं दक्षा । दृष्टिस्स्यादसौम्येक्षणीत्यमरः । प्रतिकूला हतवती सा दृष्टिः क्षणरुचिश्चेत् हिंसाभिलाषिणी चेत् क्षणस्फूर्जिता सती क्षणमात्रस्फूर्जितं वज्रनिर्घोषसदृशो यस्या निर्घोषस्तादृशी सती तान् भोगिनोऽपि विनाशयेत् प्रतिकूलदृष्टिमात्रं रुद्रदृष्टया मदनविनाशः कपिलदृष्टया सगरपुत्रविनाशः इत्यादिकमुदाहरणम् । एवं मदनसगरात्मजवत् अन्योऽपि दुर्वृत्तः क्रुद्धमहापुरुषदृष्टया विनश्येत् अतो दुर्वृत्तता दूरपरिहार्या इति भावः । टुओस्फूर्जा वज्रनिर्घोष इति धातुः॥ क्षणस्त्ववसरे मध्यकालभेदाल्पकालयोः । हिंसाव्यापारवैकल्यपरतन्त्रत्वपर्वसु । उत्सवे कोश आनन्दे गव्यूतिद्वयगर्हयोः इति भट्टबाणः । दृष्टं पुरुषार्थं स्रक्चन्दनवनितादिकमित्यर्थः । अर्थान्तरम् । यादृशेन भूतानि आलोकावधि सुगतिं विन्दन्ति नेत्राधीनतया जन्तवः प्रकाशपर्यन्तं समीचीनं गमनं विन्दन्ति । आलोकः प्रकाशः तस्यावधिरेवावधिर्यस्मिन् कर्मणि तत् यथा

---

१. स्फूर्जिता ।

क्षणान्निहन्तुं दक्षा येति शेषः। तामपि दृष्टिं क्षणस्फूर्जधुः क्षणमात्रस्फूर्जधुः तनकालिकविद्युत् दृष्टेरत्यन्तप्रतिबन्धकेति भावः टु ओ स्फूर्जा वज्रनिर्घोष इत्यस्मात् ट्वितोऽधुजित्यधुच् ॥ १२ ॥

इति श्रीमत् श्रीशैलकुलतिलकस्य पदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीवेङ्कटाचार्यसोमसुत्सुतस्य श्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकायां
दुर्वृत्तपद्धतिस्तुरीया ॥

भवति तथा। तस्य समीचीनत्वमस्खलितत्वमार्जवं च असौ दृष्टिः स्नेहविशेषतः मण्डूकवसारूपस्निग्धद्रव्यविशेषात् वंशे भुजङ्गभ्रमं सर्पारोपभ्रमं वितनुते मण्डूकवसाक्तनयनस्य वंशे भुजङ्गभ्रमो भवतीति प्रसिद्धिः। सा दृष्टिः केषुचित् भोगिषु सर्पेषु विषमिता प्राप्ता क्षणादेव दृष्टिं ज्ञानं निहन्तुं लोपयितुं दृष्टमितिपाठे दृष्टपुरुषादिकं निहन्तुं दक्षा समर्था तान् सर्वानपि आशु क्षणस्फूर्जिता क्षणरुचिः विद्युद्विनाशयेत् काचिदित्यनेन तीव्रतरप्रकाशैव सर्वहननसमर्था न सर्वापीति गम्यते। दृष्टिविसर्पवदतिशयोक्तिरपि। दुर्वृत्तः केनचिदधिकतरबलेन विहन्यत एव अतो दुर्वृत्तता दूरपरिहार्येत्युभावपि अर्थौ प्रकृतोपयुक्तौ ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायां दुर्वृत्तपद्धतिश्चतुर्थी ॥

असेव्यपद्धतिः ।

कठिनः कृशमूलश्च दुर्लभो दक्षिणेतरः ।
कश्चित् कल्याणगोत्रोऽपि मनुष्यैर्नोपजीव्यते ॥ १ ॥
दृष्टपङ्का प्रतिपदं स्यादल्पसरसस्थितिः ।
काले घनरसैर्योगेऽप्यसेव्या जीवितार्थिभिः ॥ २ ॥

कठिन इति ॥ कठिनो निर्दयः कृशमूलः निर्धनः मेरुस्तु मूले कृशः उपरि विस्तीर्णश्च दक्षिणेतरः अनुदारः भुवो मध्यदेशवर्तित्वात् दक्षिणदिग्भागवर्ति-पर्वतेभ्य इतरश्च "दक्षिणस्सरलावामपर्यच्छन्दानुवृत्तिषु" इति विश्वः । दक्षिणे सरलोदारौ" इत्यमरः कल्याणगात्रः शुभाकृतिरपि । सुवर्णमयशरीरोऽपि । "कल्या-णमक्षये स्वर्णे कल्याणं मङ्गलेऽपि चेति विश्वः। कश्चित् पुरुषो मेरुश्च मनुष्यैर्नोपजी-व्यते । एकत्र व्यर्थत्वादन्यत्रासाध्यत्वादिति भावः ॥ १ ॥

दृष्टेति ॥ प्रतिपदं दृष्टपङ्का ग्रीष्मे दृष्टकर्दमा दृष्टदोषा च काले वर्षाकाले कार्यकाले च घनरसैर्योगेऽपि वर्षोदकैः सान्द्रगुणैश्च योगेऽपि अल्पसरसः स्थितिः

कठिन इति ॥ बहुप्रकारमनुसृतोऽपि प्रातिकूल्यादप्रच्युतः कठिनः कृशमूलः मूलं श्रेयःप्राप्तिसाधनं तत्कृशं दुर्बलं यस्य कृशमूलः दुर्लभो विरोधिबाहुल्यात् लब्धु-मेवाशक्यः दक्षिणेतरः असमर्थः कश्चित्पुरुषः कल्याणगोत्रोऽपि प्रशस्तान्वयोऽपि मनुष्यैः नोपजीव्यते गुणान्तरसत्वेऽपि काठिन्यसत्वेनासेव्य एवेति भावः ॥ अर्थान्तरं प्रतीयते । कठिनः पर्वतत्वादेव कठिनस्पर्शवान् कृशमूलः महामेरोरग्रात् कुमूलं कृशमिति पुराणं । दुर्लभः विप्रकर्षात् पर्वतकान्तारायन्तरितत्वात् च प्रायुमेवाशक्यः दक्षिणेतरः सर्वेषामुत्तरः मेरुरिति हि प्रसिद्धिः । कल्याणगोत्रोऽपि सुवर्णपर्वतोऽपि कश्चिदुपजीव्यः मनुष्यैः अशक्तैः नोपजीव्यते ॥ १ ॥

दृष्टेति ॥ प्रतिपदं मुहुर्मुहुः दृष्टपङ्कः "अस्त्री पङ्कं पुमान्पाप्मेत्यमरः" अल्परससंस्थितिः अल्पद्रव्यसद्भावः । "रसो रागे विशेषे द्रवे" इति भट्टबाणः । काले कालविशेषे घनरसैः दृढानुरागैः सुहृद्भिर्योगेऽप्याजीवनार्थिभिः शरीरयात्राकामैः असेव्यस्स्यात् ॥ अर्थान्तरम् । प्रतिपदं पदेपदे अनेकप्रदेशेष्वित्यर्थः । दृष्टपङ्कः

---

१. गोत्रोऽपि २. रससंस्थितिः । ३. सेव्याजीवनार्थिभिः ।

स्वतस्सत्वविहीनानां सत्तयैवापराध्यतः ।
कथंकारं प्रतीकारः कल्पकोटिशतैरपि ॥ ३ ॥
अपि सन्तापशमनाः शुद्धास्सुरभिशीतलाः ।
भुजङ्गसङ्गाज्जायन्ते भीषणाश्चन्दनद्रुमाः ॥ ४ ॥

अल्पपुरुषस्थितिश्च जीवितार्थिभिश्च असेव्या स्यात् "उत्तमानेव सेवेत प्राप्तकाले तु मध्यमानिति धृतराष्ट्रप्रजागरे उक्तत्वात् । कालेषु घनरसैः योगेपीत्युक्तम् ॥ २ ॥

यस्य यत्सत्ता स्वरूपविरुद्धा तयोः कदापि न सम्बन्ध इत्याह— **स्वत इति** ॥ स्वतः सत्वविहीनानां सत्वगुणरहितानां तामसादीनां विद्यमानतारहितानां च, सत्तया साधुभावेनैव विद्यमानतयैव च अपराध्यतः, सत्तैव तेजस्तिमिरस्य विरुद्धा प्रतीकारः विरोधपरिहारः, कल्पकोटिशतैरपि कथंकारं कथं स्यादित्यर्थः । "अन्यथैवं कथमित्थं सुसिद्धाप्रयोगश्चेत्" इति कथमि उपपदे स्वार्थे कृञो णमुल् ॥ ३ ॥

अपीति ॥ स्पष्टम् ॥ मुखेन गरलं मुञ्चन्मूले यदि महोरगः। फलसन्दोहगुरुणा तरुणा किं प्रयोजनम् ॥ सुपुष्पितस्सारफलः फलितस्स्यादुरासदः । अपक्वः पक्वसङ्काशः सच शीर्यत कर्हिचित् ॥ इत्यादि स्मारितम् ॥ ४ ॥

"दङ्केऽस्त्री शातकर्दमौ" इत्यमरः। अल्परससंस्थितिः माधुर्यादिसद्भावः अल्पो यस्य सः अल्परससंस्थितिः कालेन रसैः जलैः योगेऽपि ॥ "मेघपुष्पं घनरसमित्यमरः" जलाशयः जीवनार्थिभिः जलार्थिभिरसेव्यस्स्यात् अतिवृष्टिदशायामिव तदन्यत्र जलाभावादित्यर्थः ॥ २ ॥

स्वत इति ॥ सच्छब्दः साधुवाचकः स्वतस्सत्वविहीनानां प्रकृत्या आनुकूल्यरहितानां सत्तयैव सद्भावमात्रेण दुह्यताम् । एवकारेण प्रयोजनविशेषशङ्का न द्रोहप्रयोजिकेति सूच्यते । ईदृशानां पुंसां कल्पकोटिशतैरपि कथङ्कारं प्रतीकारः न कथंचिदपीत्यर्थः । द्रोहप्रयोजिकायास्सत्ताया अपनेतुमशक्यत्वादिति भावः ॥ ३ ॥

अपीति ॥ चन्दनद्रोः मेव मा अतिशय इवातिशयो येषां ते चन्दनद्रुमाः पुरुषाः सन्तापशमना अपि चन्दनं यथा देहतापं शमयति तद्वन्मनस्सन्तापं दुःखं शमयन्तो विशुद्धा अपि द्रोहरहिता अपि चन्दनस्य दुष्टद्रव्यसम्पद्राहित्यं शुद्धिः

नीचानुसरणान्मन्ये निसर्गपरिशुद्धयोः ।
गतिः कुटिलतां याति गङ्गायमुनयोरिव ॥ ५ ॥
मित्रे भवति वैमुख्यं मैत्री दोषाकरेण च ।
अपि तीर्थप्रसूतानां कैरवाणां रजोभृताम् ॥ ६ ॥

नीचेति ॥ नीचानुसरणात् नीचसेवनात् उन्नतभूमेः निम्नदेशे प्रवहणात् च गतिः बुद्धिः गमनं च, "गतिस्तु गमने मार्गे दशायां बुद्ध्युपाययोः ॥ इति निघण्टुः ॥ शेषं स्पष्टम् ॥ मन्ये इति निपातप्रतिरूपकमव्ययमिति भोजराजः ॥ "अधमांस्तु न सेवेत य इच्छेद्भूतिमात्मनः । यदि सन्तं हि सेवेत यद्यनन्तं तमस्विनम् । वासो यथा रागवशं प्रयाति तथा स तेषां वशमभ्युपैतीत्यादि स्मारितम् ॥ ५ ॥

मित्र इति ॥ तीर्थप्रसूतानाम् योग्यादुत्पन्नानां जलावतारोत्पन्नानां च रजोगुणवतां परागवतां च कैरवाणां शठानां कुमुदानां च, मित्रे सख्यौ सूर्ये च, वैमुख्यं भवति दोषाकरेण पापात्मना चन्द्रेण च, मैत्री भवति । अतो न सेव्य इति भावः ॥ नन्वसेव्यत्वे कैरवाणि न निदर्शनमिति चेत् न रजोभृतां मित्रवैमुख्यादिके निदर्शनेन समर्थिते सति तेषामसेव्यत्वसिद्धेः ॥ ६ ॥

चन्दनं यथा सुरभि सुगन्धाढ्यं शीतलं तद्वत् सुरभयोपि विश्रुता अपि शीतला अपि सौम्या अपि भुजङ्गसङ्गात् दुर्जनसम्बन्धात् भीषणा जायन्ते चन्दनद्रुमपरविशेषणानामर्था उक्ता एव । भुजङ्गस्सर्पः द्रुमः वृक्षः इति ॥ ४ ॥

नीचेति ॥ निसर्गपरिशुद्धयोरपि प्रकृत्या परिशुद्धयोरपि द्वयोस्सुहृदोः गतिस्स्वभावः नीचपुरुषानुसरणात् कुटिलतां याति गङ्गायमुनयोर्यथा निम्नानुसरणात् प्रवाहः कौटिल्यं याति तद्वदिति भावः ॥ ५ ॥

मित्र इति ॥ तीर्थप्रसूतानामपि परिशुद्धमातृपितृजातानामपि रजोभृतां राजसानां पुंसां कैरवाणां च पुष्करादिपुण्यतीर्थजातत्वं परागवत्त्वं च पदद्वयोक्तं कैरवविशेषणं मित्रे सुहृदि सूर्ये च वैमुख्यं विरुद्धादङ्मुखत्वं दर्शनविरोधित्वं भवति चन्द्रेण दोषाणाप्राकरेण च सख्यं च भवति इन्दुः कुमुदबान्धव इति प्रसिद्धेः ॥ ६ ॥

अपि निर्मुक्तभोगेन स्वान्तस्थविषयेक्षया ।
असद्भावाय जायेत जिह्मगेन सहासिका ॥ ७ ॥
मण्डूकरावि‌णं सर्पं गोमुखं च मृगादनम् ।
न सुहृत्त्वेन मन्येत मानयन्तं च वैरिणम् ॥ ८ ॥

अपीति ॥ निर्मुक्तो भोगो येन तेन निर्मुक्तो मुक्तकञ्चुकः भोगश्शरीरं यस्य तेन च तथोक्तेन, जिह्मगेन कुटिलवृत्तिना सर्पेण च सहासिका सहावस्थानं, "धात्वर्थनिर्देशे ण्वुल् । स्वान्तःस्था मनःस्थिता अभिलषिता ये विषयाः भोग्यपदार्थाः । यद्वा स्वस्यान्ते समीपे तिष्ठन्तीति तथोक्ताः ते च ते विषयाः तेषामीक्षया दृष्ट्या, स्वस्यान्तस्तिष्ठतीति अन्तस्थं विषं यस्यास्सा तथोक्ता तया विषगर्भया ईक्षया दृष्ट्या, असद्भावाय दुष्टत्वाय नाशाय, जायेत अतो विषयभोगलम्पटेन सहवासो न कार्य इति भावः ॥ ७ ॥

मण्डूकेति॥ मण्डूक इव रौतीति मण्डूकरावी तं । कर्तर्युपमान इति णिनिः। सर्पं सर्पजातिषु तादृशः कश्चित् सर्पोऽपि वा गोमुखं तादृशमुखयुक्तं मृगादनं व्याघ्रं व्याघ्रजातिषु तादृशः कश्चिदस्ति तं दृष्ट्वा तादृशोऽयमिति न विश्वसेदित्यर्थः । मानयन्तं वैरिणं च सुहृत्त्वेन शोभनहृदयत्वेन मित्रत्वेन च न मन्येत । वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधा इत्युक्तदीपकालङ्कारः ॥ "न विश्वसेदविश्वस्ते

अपीति ॥ स्वान्तस्थविषयेक्षया स्वान्तस्थः स्वहृद्गतो यो विषयो युवत्यादिः तद्दर्शनेन । "विषयः स्त्यादिराश्रयोः । आस्पदे गोचरे दीपे भाजने चावलम्बने" इति भट्टबाणः । स्वान्तं हृन्मानसं मन" इत्यमरः । निर्मुक्तभोगेन परित्यक्तसुखानुभवेन जिह्मगेन वक्रगतिना दुर्जनेन सहासिकापि असद्भावाय निन्दितत्वाय जायते। अर्थान्तरम् । स्वान्तस्थविषयेक्षया स्वस्य निर्मोकस्यान्तर्गतास्पददर्शनेन अत्रास्पदं वपुरेकमेव निर्मोकव्यतिरेकेणास्पदत्वात् निर्मोकत्यागेऽपि नास्पदहानिरिति मत्वेत्यर्थः। निर्मुक्तभोगेन । "निर्मुक्तो मुक्तकञ्चुक इत्यमरः" भोगः सर्पशरीरं "भोगो वेश्याभृतौ राज्ये सौख्येऽर्थे पालने रतौ । विहारे व्यवहारे च फणिनां फणदेहयोः" इति भट्टबाणः । मुक्तकञ्चुकवपुष इत्यर्थः। जिह्मगेन सर्पेण।" जिह्मगः पवनाशनः इत्यमरः सहासिकापि असद्भावाय सद्भावस्सत्ता तद्विरहाय जायेतेत्यर्थः ॥ ७ ॥

मण्डूकेति ॥ मण्डूकवद्रौतीति मण्डूकरावी तं सर्पम् असून् हरतीति असुहृत् तस्य भावो असुहृत्त्वं गोः मुखमिव मुखं यस्य सः गोमुखः तादृशं मृगादन

घोराः त्यक्तमिथोवैरास्सौकर्यवदुपद्रवे ।
दण्डेनापि न भज्येरन् पापकुण्डलिमण्डलाः ॥ ९ ॥
अनाकलितमानुष्याः क्षमासंस्पर्शवर्जिताः ।
प्रतिबुद्धैर्न सेव्यन्ते पूर्वदेवविरोधिनः ॥ १० ॥

विश्वस्तं नातिविश्वसेत् । विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति" इति नीतिविदः ॥ ८ ॥

घोरा इति ॥ घोराः क्रूराः पापाः, कुण्डलिमण्डलाः सर्पसमूहा इव तथोक्ताः, सौकर्यं सुकरत्वमस्यास्तीति सौकर्यवान् सुलभ इति यावत् । तादृशे उपद्रवे अल्पोपद्रवेऽपीत्यर्थः । सौकर्यं सूकरभावश्च तदेषामस्तीति तद्वन्तो वराहाः "सौकर्यं स्यादनायासे सूकरस्य च कर्मणि" इति विश्वः। तेषामुपद्रवे तत्कर्तृकोपद्रवे। ते हि वल्मीकानि खनन्ति । त्यक्तमिथोवैरास्सन्तः सङ्घीभूय पलायमानास्सन्तो दण्डेनापि न भज्येरन् " स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च । कुष्ठप्रभेदेऽप्युपसूर्यके च भुजङ्गभेदे शुनि मण्डलः स्यात् "बिम्बोऽस्त्री मण्डलं त्रिष्विति च पुल्लिङ्गता ॥ ९ ॥

अनाकलितेति ॥ अनाकलितमगृहीतं मानुष्यं मनुष्यकर्मे येषां ते तथोक्ताः पिशाचव्यापारवन्त इत्यर्थः ॥ गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ्

व्याघ्रं "तरक्षुस्तु मृगादनः" इत्यमरः । तमपि प्राणहारित्वेन मन्येत मानयन्तं बहुमतिं कुर्वन्त वैरिणं च असुहृत्त्वेन मन्येत । सुहृन्मित्रममित्रमसुहृत् ॥ ८ ॥

घोरा इति ॥ घोराः दारुणाः त्यक्तमिथोवैराः परित्यक्तान्योन्यद्वेषाः पापा एव मण्डलिनः श्वानः तेषाम्मण्डलाः समूहाः सौकर्यवदुपद्रवे सुकरस्य भावः सौकर्यम् आनुकूल्यमित्यर्थः सूकरस्य भावः सौकर्यं वराहत्वं तद्वन्तः सूकरास्साधव एव वराहत्वेन रूप्यन्ते तेषामुपद्रवे प्रवृत्तास्सन्तो दण्डेनापि न[1] भज्येरन् वैमुख्यं न भजन्ति राजदण्ड एव दण्डत्वेन रूप्यते "मण्डली श्वा रविः शक्रो मार्जारो भुजगो नृपः" इति भट्टबाणः। मण्डलं चक्रबाहुल्यमित्येतत् बाहुल्याभिप्रायं अत एव भट्टबाणः, मण्डलं त्रिषु बिम्बस्स्यात् वृन्दे द्वादशराजके" इत्यतः पुल्लिङ्गनिर्देश उपपद्यते ॥ ९ ॥

अनाकलितेति ॥ अनाकलितमानुष्याः मनुष्याणां समूहो मानुष्यम् अगणितमनुष्यसमूहाः । क्षमासंस्पर्शवर्जिताः क्षान्तिसम्बन्धरहिताः पूर्वदेवविरोधि-

---

१. मण्डलि ।

अमित्रे विश्वासः श्वपचकरके सौमिकरसः
कपाले गङ्गाम्भः खलपरिषदङ्के सुजनता ।
परिक्षीणाचारे श्रुतमनुपनीते च निगमः
स्वतस्सिद्धां शुद्धिं त्यजति विपरीतं च फलति ॥

प्रत्ययः। ब्राह्मणादिराकृतिगण इत्युक्तं। क्षमासंस्पर्शेन च क्षमागुणसंस्पर्शेन भूतलसंस्पर्शेन च, वर्जिताः अनाकलितमप्राप्तं मानुष्यं मनुष्यभावो मनुष्यत्वं येषां ते तथोक्ता इति च पूर्वं देवविरोधिनो देवद्वेषिणः पश्चात् ब्राह्मणद्वेषिणश्च प्रतिबुद्धैः बुद्धिमद्भिः न सेव्यन्ते नाश्रीयन्ते पूर्वदेवाः राक्षसाः तद्विरोधिनो देवाः प्रतिबुद्धैः मोक्षार्थिभिः न सेव्यन्ते ॥ यथा मोक्षकामैः अन्यदेवता न सेव्यन्ते दूरं परिहियन्ते एवं बुद्धिमद्भिः दुर्जना न प्राप्या इत्यर्थः ॥ १० ॥

परिक्षीणाचारस्य श्रुतमपि विदुषोऽतिक्रमे दण्डभूयस्त्वहेतुत्वात् अधिकानर्थं सम्पादयतीति सदृष्टान्तमाह—**अमित्र इति** ॥ श्वपचानां चण्डालानां, करकं

नः पूर्वेषामाचार्याणां देवानां अनभिमतकारिणः पुरुषाः प्रतिबुद्धैः विवेकिभिः न सेव्यन्ते शरीरयात्रार्थं नोपसृप्यन्ते। अर्थान्तरम्। अनाकलितमानुष्याः अनादृतमनुष्यभावाः क्षमासंस्पर्शवर्जिताः भूसम्बन्धरहिताः पूर्वदेवविरोधिनः असुरशत्रवः देवाः प्रतिबुद्धैः मुमुक्षुभिः न सेव्यन्ते " प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलमिति वचनात् ॥ १० ॥

अमित्र इति ॥ अमित्रे शत्रौ विश्वासः हितत्वनिश्चयः स्वतस्सिद्धां स्वाभाविकीं शुद्धिं त्यजति प्रातिकूल्यशङ्काविरहश्शुद्धिः सा च विश्वासस्य स्वाभाविकी नतु कञ्चिदुपाधिमपेक्षते शत्रौ विश्वासतोऽपि विपरीतव्यापारदर्शनात् प्रातिकूल्यशङ्काविरहोऽपैतीत्यर्थः। न तावन्मात्रं सविश्वासो विपरीतं च फलति विश्वासवर्ति शत्रोरुपद्रवस्य सुकरत्वात् विश्वासे शुद्धिविपरीतफलजनकत्वव्यपदेशः श्वपचकरके सौमिकरसोऽपि स्वतस्सिद्धां शुद्धिं त्यजति विपरीतं च फलति। शुद्धिः पापक्षयहेतुता विपरीतफलजनन कपाले नरशिरःकपाले गङ्गाम्भश्चैवमेव स्वतस्सिद्धां शुद्धिं त्यजति विपरीतञ्च फलति ॥ खलपरिषदङ्के सुजनताप्येवं शत्रौ विश्वासवदेव ।

तरतु विवित्सयाब्धिमधिरोहतु शैलतटं
धमतु च धातुवर्गमधिगच्छतु शस्त्रमुखम् ।
तदिदमरुन्तुदं यदुत बह्ववधाय भिया
धनमदमेदुरक्षितिभृदङ्गणचङ्क्रमणम् ॥ १२ ॥

पात्रविशेषः, तस्मिन् सौमिकरसः देवतासमर्पितावशिष्टस्सोमरसः, जनानां समूहो जनता, शोभना चासौ जनता च सुजनता । "ग्रामजनबन्धुभ्यस्तल्" इति समूहार्थे तल् प्रत्ययः । स्पष्टमन्यत् ॥ ११ ॥

राजगृहं द्रव्यचौर्याद्यारोपणादिभिः दण्डहेतुत्वात् असेव्यमित्याह — **तरत्विति** ॥ विवित्सया धनलाभेच्छया "विदृ लाभे इत्यस्मात् सन् ॥ अब्धिं तरतु नानादेशान्तरं गच्छतु कामचारे लोट् । ततोऽनिष्टं नास्तीत्यर्थः । धातुवर्गम् अश्मविकारसमूहं सुवर्णीकरणाय धमतु च । अग्नौ पुटपाकार्थं निक्षिप्य मुखेन वायुफूत्कारं करोतु । अधिगच्छतु शस्त्रमुखं । तदपि शक्यमेवेति भावः । धनलाभाय खड्गप्रहारादिसहनात् भिया भयेन कुत्र को वापराधस्स्यादिति भयेन बहु यथा भवति तथावधायाप्रमादेन स्थित्वा ॥ "प्रमादोऽनवधानतेत्यमरः"

अङ्कः समीपं परिक्षीणाचारे श्रुतमप्येवं (शत्रौ विश्वासवदेव) कपाले गङ्गाम्भोवदेव श्रुतं शास्त्रार्थज्ञानं पापक्षयहेतुत्वं विहाय पापजनकत्वं भजते "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा" इति । पापक्षयहेतुता "मतिपूर्वं हते तस्मिन्निष्कृतिर्नोपलभ्यते इति पापहेतुता अनुपनीते निगमश्च स्वतस्सिद्धां शुद्धिं त्यजति । विपरीतं च फलति स्वाध्यायो देव पवित्रं वा इति पापक्षयहेतुता । "उपनीय गुरुरिशष्यं महाव्याहृति-पूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्" इत्युपनीतस्यैव अध्यापन-विधानात् उपनयनं विद्यार्थस्य श्रुतितः संस्कार इति अध्ययनार्थतया उपनयन-विधानात् तदतिक्रमे गुरुशिष्ययोरुभयोरपि दोषस्मरणात् "अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति । तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति" इति पापहेतुता अमित्रे विश्वास इति प्रस्तुतार्थः दृष्टान्तार्थमितरोपादानम् ॥ ११ ॥

तरत्विति ॥ भिया बह्ववधाय अत्यन्तमवहितस्य क्षितिभृदङ्गणचङ्क्रमण

धनमदेन मेदुराणां क्षितिभृतामङ्गणे चङ्क्रमणं गृहे परिभ्रमणमित्यर्थः । यदुत तदिदमरुन्तुदं दुःखावहम् उतेति निन्दाद्योतकम् । स्तब्धोऽस्युतेतिवत् ॥ १२ ॥

इति श्रीमत् श्रीशैलकुलतिलकस्य प्रदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीवेङ्कटाचार्यसोमसुत्सुतस्य श्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकाख्यायामसेव्य—
पद्धतिः पञ्चमी ॥

यदस्ति तदिदमेवातिदुष्करार्थसाधनादब्धितरणादेरुपायादप्यरुन्तुदं मर्मस्पृक् अतो धनमदमत्ता धनिका न सेव्या इति भावः ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायामसेव्यपद्धतिः पञ्चमी ॥

महापुरुषपद्धतिः ।

सतामेव खपुष्पत्वमेषां यत्सदसत्त्वयोः ।
न जातु तस्य तत्ताभ्यामिति तेषां स विश्वदृक् ॥ १ ॥

एवमज्ञानमूलदोषविषयपद्धतीः प्रणीयानन्तरं ज्ञानमूलगुणविषयपद्धतयः प्रणीताः।
तत्र सकलगुणानामाश्रयत्वात् महापुरुषस्य महापुरुषपद्धतिः प्रथममुक्ता ॥

सतामिति ॥ यत्सदसत्वयोः, यस्य महापुरुषस्य, सदसत्वयोः एषां सतामेव खपुष्पत्वमप्रसिद्धत्वं सर्वज्ञस्य सत्वे इतरसज्जनानामप्रसिद्धत्वं तदसत्वेऽपि सतामेव खपुष्पत्वं शून्यत्वं सन्मार्गप्रकाशकस्य महाजनस्याभावे सत्पुरुषदौर्लभ्यमित्यर्थः । जातु कदाचिदपि तस्य महापुरुषस्य तत्ताभ्यां तेषां सतां ताभ्यां सत्वासत्वाभ्यां न खपुष्पत्वं नास्तीत्यर्थः । सतां सत्त्वे सर्वज्ञस्याप्रसिद्धत्वं नास्ति । असत्त्वे च शून्यत्वं नास्तीति । एवं तेषां सतां मध्ये स विश्वदृक् सर्वज्ञः । अत्र निदर्शनम् । विश्वदृक् जगच्चक्षुः सूर्यः । कर्मसाक्षी जगच्चक्षुरित्युक्तेः । यत्सदसत्त्वयोः यस्य सूर्यस्य सदसत्त्वयोः सतां नक्षत्राणामेव खपुष्पत्वं सत्त्वे खं शून्यं पुष्पं

सतामिति ॥ यस्य सूर्यस्य सत्वे असत्वे च येषां सतां विद्यमानानामेव नक्षत्राणां खपुष्पत्वं गगनकुसुमत्वम् असत्कल्पत्वमित्यर्थः खपुष्पत्वं खे पुष्पवत् चारुतापादकत्वं तेषां नक्षत्राणां ताभ्यां सत्वासत्वाभ्यां तस्य सूर्यस्य जात्वपि तत् खपुष्पत्वं गगनपुष्पवत् असत्कल्पतापि न खे चारुतापादकत्वं च यद्यपि नक्षत्रासत्वे सूर्यस्य खे पुष्पवत् शोभावहत्वमस्ति तथापि तन्न नक्षत्रासत्वप्रयुक्तमिति विशिष्टनिषेधः इत्यतो हेतोः स सूर्यो विश्वदृक् जगच्चक्षुः "कर्मसाक्षी जगच्चक्षुः" इत्यमरः । नक्षत्रेषु स्वसत्तया दृक्भूतः दर्शनहेतुभूतः तदितरेषु स्वसत्तया दृग्भूत इति विश्वदृक्त्वमुपपद्यते । अर्थान्तरम् । यत्सदसत्त्वयोः यस्य विद्याधिकस्य सत्वे असत्वे च सतां विद्यमानानामेव येषां सतां विदुषां खपुष्पत्वं प्रसिद्धता । यत्सत्वे यदसत्वे च खपुष्पत्वं खानामिन्द्रियाणां पुष्पवत् प्रीतिकरत्वं तेषां विदुषां ताभ्यां सत्वासत्वाभ्यां तस्य विद्याधिकस्य जात्वपि तत्खपुष्पत्वं न अन्यविद्वत्सत्वेऽपि अप्रसिद्धता न । इन्द्रियाणां चक्षुरादीनां प्रीतिजनकत्वं च अन्यविद्वदसत्व-

सन्नियोगेन शिष्टानां वर्णादीनां स्वसूत्रतः ।
प्रवृत्तिं च निवृत्तिं च न भिन्द्यात्साधुशब्दवत्[1] ॥ २ ॥

विकासं येषां तत्त्वं । दिवा नक्षत्रसत्वेऽप्यवर्णात् ॥ "खमिन्द्रिये सुखे स्वर्गे शून्ये बिन्दौ विहायसि । पुष्पं विकासे कुसुमे स्त्रीणां रजसि च स्मृतमितिच" इति विश्वः । असत्वे खे आकाशे पुष्पवत् स्थितत्वं तथा भानात् जातु कदापि तस्य सूर्यस्य ताभ्यां नक्षत्रसत्त्वासत्वाभ्यां खपुष्पत्वं नास्तीति तेषां नक्षत्राणां मध्ये स विश्वदृक् जगच्चक्षुः । प्रकृताप्रकृतश्लेषः ॥ तेनोपमालङ्कारो व्यज्यते ॥ १ ॥

महाजनस्सतां नियमनेन शिष्टानां ब्राह्मणादीनां स्वसूत्रानुगुण्येन प्रवृत्तिं निवृत्तिं च न भिनत्तीत्याह—**सदिति** ॥ सत्पुरुषाज्ञया स्वसूत्रतः आपस्तम्बादिसूत्रानुसारेण व्याकरणसूत्रानुसारेण च, शिष्टानां शिक्षितानां सह विहितानां च, वर्णादीनां ब्राह्मणादीनां आदिशब्देनाश्रमादीनां ग्रहणम् । "वनोरचेत्यादिना ङीप् । सन्नियोगेन रेफादिवर्णानां च साधुशब्दवत् साधुशब्दानामिव तल तस्येति वतिप्रत्ययः । प्रवृत्तिम् । शाखाधीशे शान्तियुक्तेरिति बृहस्पतिमौढ्यादिषु प्रथमोपाकर्मादिषु प्रवृत्तिं शुक्रमौढ्यादिषु निवृत्तिं ङीबादिना सह रेफादीनां प्रवृत्तिं तदभावे तदभावमौत्वप्रतिषेधस्साकच्कस्यवा वक्तव्यश्चादुत्वं चेत्यादिषु औत्वाद्यन्ते उत्वानिवृत्तिमित्यादिक न भिन्द्यात् महापुरुषो न निरुन्ध्यात् । अपि तु प्रवर्तयेत् । अर्हार्थे लिङ् अनाशीरर्थ-

प्रयुक्तं न इत्यतो हेतोस्स विश्वदृक् सर्वज्ञः "खं...सौ व्योम्नि चेन्द्रिये । दृक् बुद्धौ दर्शने नेत्रे स्त्री स्याद्दृष्टिरिति त्रिषु । नक्षत्रमृक्षं भञ्ज्योतिस्सन्ति तारोडुतारकाः । दोषज्ञस्सन् दीर्घदर्शी मनीषीति भट्टत्राणः ॥ १ ॥

सदिति ॥ साधुशब्दवित् साधुरयमिति शब्दं लब्धवान् विदृ लाभ इति धातुः । साधूनामनुशासनरूपे शब्दे वर्तमान इति वार्थः । विद सत्तायामिति धातुः । साधूनां निबन्धात्मकं शब्दं विचारयन्निति वार्थः विद विचारणे विद ज्ञान इति धातुः । शिष्टानां आचार्याणां सन्नियोगेन समीचीनेनाशासनेन स्वसूत्रानुसारेणैव प्रवर्तितव्यं निवर्तितव्यं वेति । एवंरूपेण स्वसूत्रतो गृह्यसूत्रतो ज्ञायमानानां वर्णादीनां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां अन्येषां च प्रवृत्तिं जातकर्मादिषु प्रवृत्तिं निवृत्तिं च "वाचं यच्छत्या नक्षत्रेभ्यः" इत्यादिप्रोक्तां निवृत्तिं च । न भिन्द्यात् न लोपयेत् न चान्यथा कुर्यात् ॥ अर्थान्तरम् । साधुशब्दवित् वैय्याकरणसम्मतः

१ वित् ।

मुक्तानुगुणवृत्तानां भजतां पावनीं गतिम् ।
नित्यं विष्णुपदे वृत्तिस्तारकाणां सितात्मनाम् ॥ ३ ॥

कत्वेन सार्वधातुकत्वात् श्नं । यासुटो ङित्त्वात् श्नसोरल्लोप इत्यल्लोपः । नकारमात्रस्य श्रवणं । सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायोऽत्रानुसन्धेयः । उपमालङ्कारः ॥ २ ॥

विष्णुभक्तिमानेव महाजन इत्यभिप्रेत्याह—**मुक्तेति** ॥ मुक्तपुरुषानुरूपव्यापारवतां मुक्ता इवानुसृतगुणानां वृत्तानां वर्तुलानां च पावनीं पवित्रकारिणीं गतिमुपायं प्रपत्तिं भजतां वायुसम्बन्धिमार्गमाश्रयताम् च । "गतिस्तु गमने मार्गे दशायां बुद्ध्युपाययोः" इति विश्वः । सितात्मनां परिशुद्धमनसां शुक्लरूपाणां च तारकाणां नक्षत्राणां संसारं तारयतां च "कनीनिकायां नक्षत्रे तारकं तारकापि च" इति तारकशब्दस्य विश्वप्रकाशे नपुंसकत्वमुक्तम् ॥ नित्यं विष्णुपदे भगवत्पादे आकाशे च वृत्तिः स्थितिः भवति ॥ ३ ॥

शब्दवित् स्वसूत्रतः स्वविधायकसूत्रेण सन्नियोगो विधानं समित्येकीभावे एकविधानेनेत्यर्थः न सर्वस्यापि एकमेव विधेयस्य विधानमिति यद्यपि तथापि विधेयभेदप्रयुक्तो भेदाभाव इहोपसर्गार्थः । शिष्टानां विहितानां वर्णादीनां प्रवृत्तिं च निवृत्तिं च न पृथक्कुर्यात् ॥ २ ॥

मुक्तेति ॥ मुक्ताः त्यक्तप्रकृतिसम्बन्धाः तेषामनुगुणमुचितं वृत्तमात्मगुणजातं येषां तेषां पावनीं पवित्रभूतां गतिं रीतिं भजतां तारकाणां विपन्नान्विपदस्तारयतां सितात्मनां निष्कलङ्कज्ञानानां पुंसां नित्यं विष्णुपदे भगवच्चरणारविन्दे वृत्तिश्चित्तवृत्तिर्भवति । अर्थान्तरम् । मुक्ताः मुक्ताफलानि तदनुगुणं तत्सदृशं यथा भवति तथा वृत्तानां वर्तुलानां पावनीं परिवाहानिलायत्तां गतिं सञ्चारं भजतां सितात्मनां शुक्लशरीराणां तारकाणां नक्षत्राणां नित्यं विष्णुपदे आकाशे वृत्तिः स्थितिर्भवति ॥ ३ ॥

धर्मसेतुनिविष्टानामचलानां गरीयसाम् ।
दक्षिणोत्तरवृत्तीनां दृष्टिः पापनिवर्तिनी ॥ ४ ॥
अनङ्गीकृतकामानामनुमानार्हवर्ष्मणाम् ।
धृतनिर्मलतीर्थानां भूतिलेपो[1] विभूषणम् ॥ ५ ॥

महाजनदर्शनं पापनिवर्तकमित्याह—**धर्मेति** ॥ धर्मसेतौ धर्ममर्यादायां निविष्टानां "द्वौ समुद्रौ वितावजूर्यौ पर्यावर्तेते जठरेव पादाः । तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तस्स्तु नातियन्त्यन्यमित्युक्तरामसेतौ निविष्टानां चाचलानां स्थिरचित्तानां दक्षिणा समर्था उत्तरा उत्कृष्टा वृत्तिः वर्तनं येषां ते तथोक्तास्तेषां गरीयसां महात्मनामचलपक्षे उत्तरदिग्भागमुपक्रम्य दक्षिणाभिमुखं स्थितानां गरीयसामचलानां गन्धमादनप्रभृतिमहापर्वतानां दृष्टिः पापनिवर्तिनी ॥ ४ ॥

महात्मनां सम्पत्तिस्सार्थकत्वादलङ्कार इत्याह—**अनेति** ॥ अनङ्गीकृतः अस्वीकृतः कामो विषयाभिलाषः यैस्तेषां शरीररहितीकृतमन्मथानां च अनुमानार्हवर्ष्मणामनुमानशब्देन व्याप्तिमूलकत्वात् तर्क उच्यते । सत्तर्कानुगृही-

---

धर्मेति ॥ धर्मसेतौ धर्ममर्यादायां निविष्टानां स्थितानां अचलानां धर्मसेतोरप्रच्युतानां दक्षिणया गुरुदक्षिणया ऋत्विग्दक्षिणया वा उत्तरा श्रेष्ठा वृत्तिश्शरीरयात्रा येषां तेषां गरीयसां परमगुरूणां दृष्टिः कटाक्षः पापनिवर्तनी दर्शनादेव साधव इति वचनात् तत्कर्मिका दृष्टिरपि तथा "यश्च रामं न पश्येत्तु यं च रामो न पश्यति । निन्दितस्स वसेल्लोके स्वात्माप्येनं विगर्हति" इति द्वेष्यापि न प्रशस्तत्वात् अर्थान्तरम् । धर्मसाधनभूते रामसेतौ स्थितानां गरीयसां पृथुतराणां दक्षिणोत्तरवृत्तीनाम् दक्षिणदिग्गता किञ्चिदपेक्षया उत्तरदिग्गता वृत्तिः स्थितिः येषां तेषामचलानां पर्वतानां दृष्टिः दर्शनं पापनिवर्तिनी "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति" इति स्मृतिः । "एतत्पवित्रमतुलं महापातकनाशनमिति च" ॥ ४ ॥

अनेति ॥ अनङ्गीकृतकामानाम् पशुपुत्रादिकामाननभ्युपगच्छताम् । अनुमानार्हवर्ष्मणाम् । अनुमायाः अनुमितेः अनर्हं वर्ष्म विग्रहो येषां तेषाम् । इदं भावि शरीरकमशरीरत्वात् कामोपहतवादिति अनुमितिरकामहतेषु न प्रवर्तते इति भावः । धृतनिर्मलतीर्थानाम् । शमदमभगवद्ध्यानादिकं शोधकं सर्वतीर्थशब्दार्थः

---

१. पोऽपि भू.

अनन्तख्यातिसम्पन्नः शुद्धसत्वस्सुधीबलः ।
धत्ते बहुसुखं भोगं श्रुतिदृष्टिस्स्थिराश्रयः ॥ ६ ॥

तप्रत्यक्षानुमानागमानामित्यर्थः ॥ अन्यत्र नार्हमनर्हं नञर्थस्य नशब्दस्य सुप्सुपेति समासः । उमाया नार्हमुमानार्हं तन्न भवतीत्यनुमानार्हम् उमायोग्यमित्यर्थः । वर्ष्म देह येषां ते तथोक्ताः तेषाम् "वर्ष्मदेहप्रमाणयोरित्यमरः । धृतं निर्मलं तीर्थं शास्त्रं गङ्गा च यैस्तेषां तथोक्तानां च । "तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु" इत्यमरः । भूतिलेपः सम्पत्सम्बन्धो भस्मलेपश्च विभूषणम् । रुद्रसाम्यमुक्तम् ॥५॥

"जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु ददाति दण्डम् । जानाति मात्रां च तथा क्षमं च तं तादृशं श्रीर्जुषते समग्रा ।" मात्रां विषयाणामनित्यत्वं इत्युक्तरीत्या महाजनस्य न्यायानुवर्तिनः सौख्यं भवतीत्याह—**अनन्तेति** ॥ अपरिमितकीर्तिसम्पन्नः अनन्त इति नामसम्पन्नश्च, शुद्धसत्वः रजस्तमोऽनभिभूतसत्वगुणः अधिकबलश्च, सुधीबलः बुद्धिबलयुक्तः श्रुतिदृष्टिर्भगवान् तस्मिन्

भूतानि निर्मलानि दुरितासहितानि तीर्थानि शोधकानि यैस्तेषां पुंसां जनकादीनाम् भूतिलेपोऽपि भूषणम् ऐश्वर्यसम्बन्धोऽपि भूषणम् "तीर्थे स्नाति तीर्थमेव समानानां भवति । नह्यम्मयानि तीर्थानि न देवा मृच्छिलादयः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः" इति वचनात् सन्त एव तीर्थं तेषां धारणे संसारपोषणे उपयुक्तवान् भूतेः लेपः भस्मलेपोऽपि भूषणम् । अन्यत्र अनङ्गः शरीरशून्यः कृतः कामः मन्मथः यैस्तेषाम् । उमायाः पार्वत्याः अनर्हं न भवतीति अनुमानार्हम् उमायाः योग्यमित्यर्थः वर्ष्म शरीरं येषां धृतं निर्मलतीर्थं गङ्गारूपं यैस्तेषां रुद्राणां भूतिलेपः भस्मलेपोऽपि भूषणमेव भगवदाज्ञया गौतमशापदूषितपुरुषमोहनार्थत्वात् भूषणमिति यावत् ॥६॥

अनन्तेति ॥ अनन्तख्यातिसम्पन्नः अपरिच्छिन्नप्रसिद्धिसमग्रः शुद्धसत्वः राजसतामसाहारावर्धितशरीरः। अत एव सुधीः यथार्थबुद्धिः बलः बलङ्करोतीति.....प्रत्ययः बलसाध्येषु कर्मसु.....श्रुतिदृष्टिः श्रुतिरिवाप्रतिहतप्रवृत्तिहेतुतया श्रुति कल्पा दृष्टिः यस्य सः स्थिरः आश्रयो यस्य सः योगक्षेमसिद्ध्यर्थं यमाश्रयते स राजा आश्रयः आश्रितसौहार्देन ऐश्वर्येण च अविश्लेषस्तस्य स्थिरत्वम् एवंभूतः पुरुषः बहुसुखं बहुविधसाधनसाध्यभोगं सुखानुभवं धत्ते आत्मनः पोष्याणां च पुष्णाति ॥ अर्थान्तरम् अनन्तख्यातिसम्पन्नः हरिशेषावनन्तौ ।

---

१. सुधीः । २. राश्रयः

अहार्यस्सर्वमध्यस्थः काञ्चनद्युतिमुद्वहन् ।
सत्प्रदक्षिणयोग्यत्वमुपयाति महोन्नतः ॥ ७ ॥

स्थिरचित्तः । यद्वा श्रुतिदृष्टिरिति व्यस्तं पदं "श्रुतिस्मृती तु वक्त्राणां चक्षुषी द्वे विनिर्मिते इत्युक्तरीत्या वेदार्थदर्शी, अन्यत्र चक्षुःश्रवाः, बहुमुखं भोगं सुखसहस्रमुखं शरीरं च धत्ते ॥ "भोगस्सुखे स्त्र्यादिभृतावहेश्च फणकाययोः इत्यमरः । अत्र शेषसाम्यम्" ॥ ६ ॥

महाजन एव सतां सेव्य इत्याह—**अहार्य इति** । अहार्यः कुदृग्भिः प्रहारायितुमशक्यः पर्वतश्च "अहार्यधरपर्वता इत्यमरः ॥ सर्वमध्यस्थः अपक्षपाती सर्वभूमण्डलमध्यवर्ती च, काञ्चनानिर्वाच्यां द्युतिं तेजः उद्वहन् सुवर्णमयश्च, महोन्नतः सर्वोत्कृष्टः अत्युन्नतश्च सतां सत्पुरुषाणां नक्षत्राणां च प्रदक्षिणयोग्यत्वमुपयाति । अत्र मेरुपर्वतसाम्यम् ॥ ७ ॥

अनन्तोऽयमिति प्रसिद्धिसंपन्नः । अपरिच्छिन्नबोधसंपन्न इति वार्थः । शुद्धसत्वः । सज्जनावमानाद्यजनकबलः अवदातविग्रह इति वार्थः सुधीः सर्वानुकूलबुद्धिः श्रुतिरेव श्रवणमेव दृष्टिः चक्षुः यस्य सः श्रुतिदृष्टिः स्थिरायाः भूमेराश्रयः बलः बलभद्रः बहुमुखं वदनसहस्रवन्तम् । भोगं सर्पशरीर धत्ते धारयति । सुधीबल इति पाठमाश्रित्य समीचीनबुद्धिबल इति प्रथमार्थे द्वितीयार्थे प्रकृष्टविज्ञानबलैकधामनीत्युक्तरीत्या ज्ञानबलरूपगुणद्वयविशिष्ट इत्यर्थ इति केचित् ॥ ६ ॥

अहार्य इति ॥ हर्तुमशक्यः अहार्यः दृढाध्यवसायः सर्वेषु मित्रशत्रूदासीनेषु त्रिष्वपि पक्षपातरहितः सर्वमध्यस्थः काञ्चन कामपि विलक्षणामित्यर्थः द्युतिं तेजस्विताम् उद्वहन् सदा उन्नतः श्रेष्ठः पुरुषः सत्प्रदक्षिणयोग्यत्वं सत्कर्तृकप्रदक्षिणगमनौचित्यमुपयाति । अर्थान्तरम् ॥ सर्वमध्यस्थः परितो वर्तमानानां भारतादिवर्षाणां मध्ये वर्तमानः काञ्चनद्युतिं स्वर्णदीप्तिम् उद्वहन् सदोन्नतः[1] नित्यमुच्छ्रितः अहार्यः पर्वतः सत्प्रदक्षिणयोग्यत्वं नक्षत्रप्रदक्षिणगमनयोग्यत्वमुपयाति ॥ ७ ॥

---

१. सदोन्नतः ।

पुण्यगन्धास्सुमनसः प्रबुद्धास्समयागमे ।
शिरसा परिगृह्यन्ते सादरं त्रिदशैरपि ॥ ८ ॥
अनुकर्तुमपह्नोतुमतिवर्तितुमीक्षितुम् ।
अशक्ये तेजसां पत्यौ मित्रतानुमतिक्षमा ॥ ९ ॥

महात्मानो देवैरपि शिरसा प्रणम्यन्त इत्याह—**पुण्येति** ॥ समयागमे सिद्धान्तशास्त्रे वसन्तादिकाले च प्रबुद्धाः ज्ञानवन्तो विकसिताश्च, पुण्यगन्धाः पुण्यसम्बन्धवन्तः मनोहरपरिमलाश्च, "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः" । यथा वृक्षस्य सम्पुष्पितस्य दूरात् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वातीति स्मृतिः स्मारिता । सुमनसो ज्ञानिनः पुष्पाणि च, "सुमनाः पुष्पमाल्योः स्त्रीदेवबुधयोः पुमानित्युभयत्रापि" कोशः। त्रिदशैः देवैरपि सादरं शिरसा परिगृह्यन्ते "सर्वेऽस्मै देवा बलिमावहन्ति" इति श्रुतेः। अत्र पुष्पसाम्यम् ॥ ८ ॥

"यश्चात्मनापत्रपते भृशं नरः सर्वस्य लोकस्य गुरुः भवत्युत । अनन्ततेजास्सुमनास्समाहितः स्वतेजसा सूर्य इवावभासते ॥ इत्युक्तमहापुरुषे तदनुग्रहेण मन्दानामपि मैत्री भवतीत्याह—**अन्विति** ॥ अनुकर्तुम् सदृशीभवितुम् अपह्नोतुम् किमस्य माहात्म्यमिति निषेद्धुं सूर्य इति कश्चित् तेजस्वी अस्ति वेति निषेद्धुं च । अतिवर्तितुम् निराकर्तुमतिलङ्घितुं च केनापि सूर्यस्य पश्चाद्भागादृष्टेरिति भावः ।

पुण्येति ॥ पुण्यगन्धाः पुण्यकीर्तयः एवं पुण्यस्य कर्मणो दूरात् गन्धो वातीति गन्धशब्दस्य कीर्त्यर्थकत्वात् । समयागमे धर्मज्ञसमये शास्त्रेषु च प्रबुद्धाः प्रकृष्टबोधाः सुमनसः विद्वांसः त्रिदशैरपि बालदशैरपि कुमारदशैरपि युवदशैरपि सादरं शिरसा परिगृह्यन्ते नमस्क्रियन्ते । अर्थान्तरम् । पुण्यगन्धाः सुरभयः समयागमे प्रातर्मध्यन्दिने सायं रात्रौ वा विकासोचितसमयप्राप्तौ सत्यां विकस्वरास्सुमनसः पुष्पाणि त्रिदशैर्देवैरपि शिरसा सादरं गृह्यन्ते म्रियन्ते ॥ ८ ॥

अन्विति ॥ तादृशतेजोविरहात् अनुकरणाशक्तिः सर्वजनप्रसिद्धत्वात् अपह्नवाशक्तिः अतिवृत्तिरतिलङ्घनम् अनुकरणशक्तस्यातिलङ्घनाशक्तिः कैमुतिकन्यायसिद्धा महापुरुषकर्मणां दुर्गमदेशव्यापित्वात् ईक्षणाशक्तिः एवंभूते तेजसां पत्यौ मित्रे चैवानुमतिक्षमा अङ्गीकारार्हा तेजश्शब्देन तेजस्विन उच्यन्ते "अप्रमेयं हि

आहितुण्डिकदृष्टीनामशेषा भोगिनः पदम् ।
न संवर्ताग्निसारथ्ये स्थाता यन्मुखमारुतः ॥ १० ॥

ईक्षितुम् क्षुद्राणां दर्शनं कर्तुं तेजसो दृष्टिप्रतिघातकत्वात् अवलोकितुं चाशक्ये तेजसां पत्यौ तेजस्विनि पुरुषे सूर्ये च मित्रता सुहृत्त्वं सूर्यत्वं च, अनुमतेः अनुज्ञायाः क्षमा अभ्युपगमयोग्या अनुमतिः पूर्णिमाभेदः "कलाहीने सानुमतिः इत्युक्तेः । तस्यां सूर्यकिरणानामेव चन्द्रे कलापूर्तिहेतुत्वात्" यमादित्या अशुमाप्याययन्तीति श्रुतेः । यत्रामुष्य सुधीभवन्ति किरणा इत्यादि प्रसिद्धेश्च । अत्र यादवः। तासां शतानि रश्मीनां...वृष्टिसर्जने। शतत्रयं हिमोत्सर्गे तावद्धर्मस्य सर्जने। आनन्दनाश्च मेध्याश्च नूतनाः पूतना... । ...वृष्टिस्तत्सर्वा अमृतास्त्रियः ॥ ९ ॥

क्षुद्रा एव क्षुद्राणां धर्षणीया न महान्त इत्याह—**आहीति** ॥ आहितुण्डिकदृष्टीनां व्यालग्राहिदृष्टीनाम् । मन्त्रौषधादिव्यापाराणामित्यर्थः "व्यालग्राह्याहितुण्डिक इत्यमरः" अशेषा शेषभिन्ना भोगिनस्सर्पाः पदं विषयः यन्मुखमारुतः येषां सर्पाणां मुखमारुतः संवर्ताग्निसारथ्ये प्रलयकालाग्निसहायभावे न स्थाता । "ष्ठागति निवृत्ताविलस्मात् लुट् । शेषमुखमारुतस्तु प्रलयकालाग्नेः सहायीभूय जगन्नाशयति तादृशं शेषं कःपरिभवेदिति भावः ॥ १० ॥

तत्तेजो यस्य सा जनकात्मजेत्यादिषु तथा दर्शनात् । नक्षत्रेष्टका उपदधात्येतानि वैदिवोज्योतीगंषि पुरस्ताद्वा एतज्ज्योतिरुदेति तस्मात्पुरस्ताज्ज्योतिरुपास्महे सूर्योज्योतिः ज्योतिस्सूर्यस्वाहा अग्निर्ज्योतिरवरुन्धे वायुर्ज्योतिरवरुन्धे सूर्योज्योतिरवरुन्धे इत्यादिषु ज्योतिश्शब्दवत्। तेजस्विनां प्रभावशालिनां पत्यौ श्रेष्ठे मैत्री परमङ्गीकर्तुं क्षमा नानुकरणं नापह्नवः नातिलङ्घनं नाकस्मिकवीक्षणं वा शक्यते कर्तुमीदृशमेव सीतावचनं" विदितस्स हि धर्मज्ञः शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसीति । सूर्यपरमर्थान्तरम् स्फुटमेव मित्रता मित्रपदवाच्यता ॥ ९ ॥

आहीति ॥ संवर्ताग्नेः प्रलयकालाग्नेः सारथ्ये साह्यकर्मणि । यन्मुखमारुतः येषां शेषव्यतिरिक्तसर्पाणां मुखमारुतः श्वासानिलो न स्थाता न स्थास्यति लुटि रूपमिदम् । अशेषाः शेषव्यतिरिक्ताः भोगिनः सर्पाः त एवाहितुण्डिकवृत्तीनां व्यालग्राहिव्यापाराणाम् ग्रहणबन्धनोत्फणीकरणादीनां पदं विषयः न पुनश्शेषोऽपि । तथा बाध्यसाजात्यमात्रेण लोकोत्तरबलं बाध्यं मत्वा बाधमानः स्वयमेव ध्वस्तो भवतीति सादृश्यात्प्रस्तुतार्थव्यक्तिः ॥ १० ॥

गरुत्मति सुपक्षतां गिरिधुरन्धरे धीरता-
मुदन्वति गभीरतामृतदीधितौ सौम्यताम् ।
विवस्वति च दीप्ततां विधिरपारागः चिरात्
अनर्घगुणचित्रितं किमपि चित्रमासूत्रयत् ॥ ११ ॥

अयोग्यघटनस्वभावोऽपि विधिः क्वचिद्योग्यघटनेन श्लाघनीयोऽपि भवतीत्याह—**गरुत्मतीति** ॥ गिरिधुरन्धरे गिरिश्रेष्ठे । विधिरनर्घगुणैः सुपक्षत्वादिगुणैः चित्रितमाश्चर्यविषयीकृतं किमपि चित्रं सज्जनाख्यालेख्यमासूत्रयत् घटितवान् एकैकं सद्गुणमन्यत्र विधायाभ्यसित्वा सज्जनाख्यं चित्रं निर्मितवानित्यर्थः । चित्रमिति निगीर्याध्यवसायलक्षणातिशयोक्तेः श्लेषमूलाभेदाध्यवसायलक्षणातिशयोक्तिरङ्गमिति तयोस्सङ्करः । अप्रस्तुतविधिस्तुत्या सज्जनस्तुतिर्गम्यत इति व्याजस्तुत्यलङ्कारः । तदङ्गं गरुत्मति सुपक्षतामित्यादिषु समालङ्कार इति सङ्करश्चेति तयोः सङ्करयोरपि सङ्करः ॥ ११ ॥

गरुत्मतीति ॥ गरुत्मति सुपक्षताम् शोभनः पक्षो गरुत्मस्य तस्य भावस्सुपक्षता गरुत्मत्पक्षोऽर्थः सत्पुरुषे तु सुपक्षता अनुकूलमित्रता । युनक्त्यर्थे प्रहृष्यत्तमसा यत्र तुष्यतीत्युक्तगुणे तात्पर्यम् अनन्तरोक्तगुणाभ्यां समुद इव गाम्भीर्ये धैर्येण हिमवानिवेति वचस्सूचितम् । समनन्तरगुणेन सोमवत्प्रियदर्शन इत्युक्तिस्स्मारिता विवस्वति च दीप्ततामित्यनेन गुणैः विरुरुचे रामो दीप्तःसूर्य इवांशुभिरित्येतत् स्मारितम् । एषु विद्यमानान् एतान् गुणानुपाददानो विधिः अनर्घगुणचित्रितं कल्याणैः गुणैः अद्भुतीकृतं किमप्यनिर्वचनीयं सर्वचेतनरक्षकं चित्रमासूत्रयत् सूचितं कृतवान् एवंभूताः पुरुषाः ईदृशगुणवत्तया करचरणादिमत्तयैव न सहसा ज्ञातुं शक्यन्ते किन्तु कार्यविशेषैरनुमीयन्त इति अभिप्रायेण सूत्रयतेः प्रयोगः ॥ ११ ॥

प्रशस्तिं विन्दन्ति प्रशमसुखदिव्यामृतरस-
प्रलीना[1] धन्यानां परिषदि न सम्पत्तिसरितः ।
अमित्रोपक्षेपक्षणविगलदात्मीयपृतना-
दृढामर्दत्रस्यद्द्रविडभटजङ्घाजवभृतः ॥ १२ ॥

सज्जनेषु दारिद्र्यमस्ति चेत् तेषां किं न्यूनम् । "तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनमिति" धनस्यैव वैयर्थ्यम् । ते त्वतिचञ्चलास्सम्पदः शान्तिसुखामृतनदीलीनास्सन्तो न श्लाघन्त इत्याह—**प्रशस्तिमिति** ॥ "शरीरपतनावधिप्रभुनिषेवणापादनादबिन्धनधनक्षयप्रशमनं धनं दन्धनम् । धनक्षयविवर्धनं धनमदूढगोवर्धनं सुसाधनमबाधमं सुमनसां समाराधनम् ॥ इत्युक्तधनं लब्ध्वा धन्यो धनगणं लब्धेति यत्प्रत्ययः। तेषां परिषदि सम्पत्तिसरितः प्रशस्तिं श्लाघां न विन्दन्तीत्यन्वयः । सम्पत्तिसरितः कीदृश्यः—अमित्रेत्यादि। अमित्रोपक्षेपक्षणे शत्रुनिरसनोद्योगक्षण एव विगलन्त्या आत्मीयपृतनायाः स्वयूथ्यसेनाजनस्य दृढो य आमर्दः प्रबलस्समन्तात् सङ्क्षोभस्तस्मात् त्रस्यन्तः शत्रव एवागता इति भ्रमेण बिभ्यन्तः ये द्रविडभटा. तेषां पलायमानानां जङ्घानां यादृशो जवस्तादृशजवभृतः द्रविडभटा ह्यतिभीरवः पलायने महावेगवन्तः तद्वत् शीघ्रगामिन्यः सम्पदो अतिचञ्चला इत्यर्थः । पुनश्च कीदृश्यः प्रशमसुखमेव दिव्यामृतरसः तत्र प्रलीनाः यथा प्रवाह-

---

प्रशस्तिमिति ॥ उत्कर्षमपकर्षमन्यद्वा किञ्चिदमित्रगतमज्ञातं ज्ञापयितुममित्रशब्दोच्चारणमित्रोपक्षेपः उच्यमानवाक्यस्य विधेयांशमश्रुत्वा तत्क्षण एव विगलन्त्या स्वानुकूलपृतनायाः दृढामर्देन बलवता गतिप्रतिबन्धकसम्मर्देन त्रस्यतां द्रविडभटानां जङ्घाजवसदृशं जवं बिभ्रतीति तादृशजवभृतः अत्यन्तास्थिरा इत्यर्थः सम्पत्तय एव सरितः प्रशमसुखदिव्यामृतरसेन प्रलीना उदन्या पिपासा येषां तेषां

---

१. नोदन्यानां ।

ां नद्यां क्षुद्रा लीना भवन्ति । तद्वत् तदीयप्रशमसुखसरिद्भिः तिरोहिता र्थः ॥ १२ ॥

इति श्रीमत् श्रीशैलकुलतिलकस्य पदवाक्यप्रमाणपारावारपारदृश्वनः
श्रीवेङ्कटाचार्यसोमसुत्सुतस्य श्रीनिवासविदुषः कृतिषु
सुभाषितनीवीव्याख्यायां रत्नपेटिकाख्यायां
महाजनपद्धतिष्षष्ठी ॥

सतां परिषदं प्रशस्तिं न विन्दन्ति "यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हतष्षोडशीं कलाम् । इति सद्भिर्निन्दितत्वादिति भावः १२॥

इति सुभाषितनीवीव्याख्यायां महापुरुषपद्धतिष्षष्ठी ॥